சிவரகசியம்

அம்சம் 8



தஞ்சாவூர் மகாராஜா சரபோஜியின்

சரசுவதி மகால் நூலகம்

தஞ்சாவூர்.

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

தஞ்சாவூர் சரசுவதி மகால் வெளியீட்டு எண். : 485

ஸ்ரீ:

।। शिवरहस्यम् ।।

சிவரஹஸ்யம்

(எட்டாவது அம்சம்)

பதிப்பாசிரியர்

தேதியூர். எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள்,
முன்னாள் மேநிலை ஸம்ஸ்கிருத பண்டிட்,
சரசுவதி மகால் நூலகம், தஞ்சாவூர்.

தஞ்சாவூர் மகாராஜா சரபோஜியின்
சரசுவதி மகால் நூலகம்,
தஞ்சாவூர்

2006 விலை : ரூ. 120-00

சிவரகசியம் அம்சம்- 8
0485
T.M.S.S.M-2016

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

நூற்பதிப்பு விளக்கக் குறிப்பு

நூற்பெயர்	:	சிவரஹஸ்யம் (எட்டாவது அம்சம்)
பதிப்பாசிரியர்	:	எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள்
வெளியிடுபவர்	:	இயக்குநர், சரசுவதி மகால் நூலகம்
வெளியீட்டு எண்	:	485
மொழி	:	ஸம்ஸ்கிருதம்
பதிப்பு	:	முதற்பதிப்பு
வெளியீட்டு நாள்	:	ஆகஸ்ட், 2006
தாள்	:	TNPL 18.6 kgs.
நூல் அளவு	:	21 x 14 c.m.
பக்கங்கள்	:	172
படிகள்	:	250
எழுத்து	:	16 & 12
அச்சிட்டோர்	:	சரசுவதி மகால் நூலகம்
புத்தகக்கட்டு	:	மெலிந்த அட்டை
பொருள்	:	சிவ தத்துவம்
விலை	:	ரூ. 120-00

CC-0. SaTrasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

வெளியீட்டாளர் முகவுரை

தஞ்சையில் அமைந்து தரணி முழுமைக்கும் பயன்பட்டுக் கொண்டிருக்கும் அரும்பெரும் நிறுவனம் சரசுவதி மகால் நூலகமாகும். சுவடிக் கருவூலமாகவும், பன்மொழி நூற்களஞ்சியமாகவும், பன்மொழி ஆய்வு மையமாகவும் திகழும் சரசுவதி மகால் நூலகம் ஆற்றிவரும் தொண்டு அளப்பரியது.

இந்நூலகம் தமிழகத்தினர் மட்டுமின்றிப் பிற மாநிலத்தவரும், பிற நாட்டினரும் பயன்படுத்தி வருகின்ற ஓர் அரிய ஞான ஆலயமாகும்.

பாரதநாடு பழம்பெரும் நாடு. உலகின் மிகச்சிறந்த நாகரிகத்திற்கும், பண்பாட்டிற்கும், மொழி வளத்திற்கும், இலக்கிய, இலக்கண மேம்பாட்டிற்கும், இயல், இசை, நாடகம், சித்திரம், சிற்பம், கட்டிடம் போன்ற நுண் கலைகளுக்கும் மெச்சும் அறிவிற்கும் மேதினியினில் உயர்நாடு.

மதச்சார்பின்மை, சமயச் சுதந்திரம் போன்றவற்றால் வேற்றுமையில் ஒற்றுமை காணும் ஒரு நாடு நம்நாடு. இமய முதல் குமரிவரை சைவநெறி தழைத்து பரவியது எனினும் தமிழகத்தில் சைவ ஒளி பரவி நாயன்மார்கள், தோன்றி சைவநெறி வளர்த்தனர். சைவநெறி அன்பு, அறம், விருந்தோம்பல், பணிவு போன்ற வாழ்வியல் நெறிகளைக் கூறுவது.

பதினெண் புராணங்களில் ஒன்றான ஸ்கந்த புராணத்தில் சிவரகசியம் எனும் பகுதியில் சிவ தத்துவங்களும், சைவ சமயச் சிறப்புகளும் கூறப்படுகின்றன. இதேபோன்று சமஸ்கிருத மொழியில் அமைந்த சிவரகசியம் நூலும் சிவ தத்துவம் பற்றிக் கூறுவதாகும். இதன் ஆசிரியர் பெயர் அறியக் கிடைத்திலது. ஒரு இலச்சத்து இருபதினாயிரம் சுலோகங்கள் கொண்ட இந்நூல் நம் சரசுவதி மகால் நூலகத்தில் மட்டுமே முழுமையாகக் கிடைத்துள்ளது. சிவபெருமானின் பன்னிரண்டு பெயர்களைக் கொண்டு

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

பன்னிரண்டு அம்சங்களாக (பகுதிகளாக) பகுக்கப்பட்டுள்ளது இந்நூல். இந்நூலின் ஒவ்வொரு பகுதியிலும் இலக்கியச் செறிவோடு சிவ தத்துவங்கள் கூறப்படுகின்றன.

1971ஆம் ஆண்டில் நமது நூலகம் திரு. சுவாமிநாத ஆத்ரேயர் எனும் சமஸ்கிருத அறிஞரைப் பதிப்பாசிரியராகக் கொண்டு 3, 4, 5, 6 அம்சங்களைப் பதிப்பித்து வெளியிட்டது. இந்நூலக முன்னாள் சமஸ்கிருதப் பண்டிட் திரு. எஸ். கிருஷ்ணமூர்த்தி சாஸ்திரிகள் அவர்களைப் பதிப்பாசிரியராகக் கொண்டு 1992ல் முதல் அம்சமும், 1996ல் 7வது அம்சத்தில் முதல் தொகுதியும், பின்னர் எஞ்சிய மூன்று தொகுதிகளும் வெளியிடப்பட்டுள்ளன. தற்போது இதே பண்டிட்டைப் பதிப்பாசிரியராகக் கொண்டு எட்டாவது அம்சம் வெளியிடப்படுகிறது.

இவ்வெட்டாம் அம்சத்தில் முப்பது அத்யாயங்கள் உள்ளன. இவற்றில் கந்தக் கடவுள் ஜைகீஷவ்ய முனிவர் உள்பட பல முனிவர்களுக்குச் சிவ தத்துவ ரகசியக் கருத்துக்களைக் கூறுவதும், சிவ பஞ்சாட்சர மந்திரச் சிறப்பும், விபூதி மகிமையும், உருத்திராட்ச மகிமையும், சிவ வழிபாட்டு முறையும், வில்வமரம், இதழ் ஆகியவற்றின் சிறப்பும், இன்னபிற செய்திகளும் அடங்கியுள்ளன. இவ்வம்சத்தில் கற்பனை உயர்வும் சொல்லாட்சிச் செறிவும் பாராட்டும் வகையில் அமைந்துள்ளன.

இந்நூல் வெளிவர நிதி உதவி நல்கிய நடுவண் அரசுக்கும், நிருவாக அலுவலர் மற்றும் வெளியீட்டு மேலாளர் (பொறுப்பு) திரு. சாமி. சிவஞானம் அவர்களுக்கும், இந்நூல் கணினி அச்சில் வெளிவர, கணினி பிரிவில் ப்ணிபுரிந்த ஏனையோருக்கும் என் பாராட்டுதல்களைத் தெரிவித்துக்கொள்கிறேன்.

சா. விஜயராஜ் குமார், இ. ஆ. ப.,
மாவட்ட ஆட்சித்தலைவர் மற்றும் இயக்குநர்,
சரசுவதிமகால் நூலகம்.

தஞ்சாவூர்
19-8-2006

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

உ

சிவமயம்

முன்னுரை

உலகின் பிற நாடுகளில் நாகரிகமும், நெறிமுறைகளும் மலராமல் அறியாமை இருள்சூழ்ந்திருந்த காலத்திலும் கர்மபூமி எனப்படும் பாரதநாடு - முதிர்ந்த நாகரிகச் சிறப்புடனும், பண்பாடு, நெறிமுறை, மொழியறிவு, இலக்கிய அறிவு, இயல், இசை, நாடகம், சித்திரம், சிற்பம், கட்டிட வடிவமைப்புத்திறன் போன்ற கலையறிவு - இறையுணர்வு இன்னபிறச் சிறப்புக்களுடனும் சிறப்புற்றிருந்தது என்பது யாவரும் அறிந்ததே.

வேத நெறிகளிலும், இறை வழிபாட்டிலும், உலகின் பிற நாடுகளுக்கு காலங்காலமாகவே நம்நாடு வழிகாட்டியாக இருந்துவந்திருக்கிறது. நம் நாட்டில் உள்ளதுபோன்ற - விரிவான - நுட்பமான சமயச் சுதந்திரம் உலகில் வேறு எந்த சமயத்திலும் இல்லை. பாரதத்தில் இமயம் முதல் குமரிவரை சைவநெறி பரந்துள்ளதெனினும் தென்னாட்டில் அதுவும் தமிழகத்தில் சைவநெறி தழைத்ததுபோல் வேறெங்கிலும் சிறப்புடன் விளங்கவில்லை எனலாம். 'தென்னாடுடை சிவனே போற்றி' என்ற வழக்கும் இதனை உறுதிசெய்கின்றது. சைவம் வளர்த்த அறுபத்துமூன்று சமயக்குரவர்கள் தோன்றிய தமிழகத்தில்தான் சைவ ஆகமங்களும் - அவ்வழிவந்த பூசை முறைகளும் இன்றளவும் தழைத்து விளங்குவதாகும். சைவ சமயச் சிறப்புப்பற்றி சிவாகமங்களும், சிவபுராணம், கந்தபுராணம், திருமுறைகள் முதலானவை எழுதாக்கிளவி எனப்படும் வேதங்கள்போல் உலகுள்ளளவும் நிலைத்திருப்பவையாகும்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

சைவ சமயச் சிறப்புப்பற்றி பதினெட்டுப் புராணங்களில் ஒன்றான ஸ்கந்த புராணத்தில் சிவரஹஸ்யம் என்ற பகுதி விரிவாகக் கூறுவதாகும். இதேபோன்று ஸம்ஸ்க்ருத மொழியில் அமையப்பெற்ற சிவரஹஸ்யம் எனும் மாபெரும் தனி நூலும் சிவ தத்துவம்பற்றி விரிவாகக் கூறுவதாகும். இதன் ஆசிரியர் யார் என்று நூலில் எவ்விடத்திலும் கூறப்படவில்லை.

ஒரு லக்ஷம் ஸம்ஸ்க்ருத ச்லோகங்கள் கொண்ட மாபெரும் இதிஹாஸமான மஹாபாரதம் பற்றிய ஒரு பழமொழி உண்டு. இந்த நூலில் கூறப்படும் தர்ம தத்துவங்கள், ரஹஸ்யங்கள் பலவும் பிறநூல்களில் காணப்படலாம். ஆனால் இதில் (மஹாபாரதத்தில்) காணப்படாத (கூறப்படாத) தர்ம ரஹஸ்யம் எதுவும் பிற நூல்களில் இருப்பதற்கில்லை என்ற கருத்துள்ள,

"यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्"

எனும் வாக்கின்படி இந்த நூல் முழுவதிலும் சைவநெறி சம்பந்தமான உயர்ந்த கருத்துக்கள் பலவும் சிறப்பாகக் கூறப்பட்டுள்ளன. ஒரு லக்ஷத்தி இருபதினாயிரம் ஸம்ஸ்க்ருத ச்லோகங்கள் கொண்ட இந்நூல் நமது சரசுவதி மகால் நூலகத்தில் மட்டுமே முழுமையாகக் கிடைக்கக்கூடியதாகும்.

சிவபெருமானின் பன்னிரண்டு பெயர்களைக்கொண்டு பன்னிரண்டு அம்சங்களாக (பகுதிகளாக) இந்நூல் பிரிக்கப்பட்டுள்ளது. 1. மாஹேச்வர, 2. பவ, 3. ஹர, 4. சிவ, 5. பர்க, 6. சங்கர, 7. உக்ர, 8. பீம, 9. சதாசிவ, 10. ஈச்வர, 11. மஹாதேவ, 12. ஈச என்ற பெயர்களுடன் 12 பகுதிகளாக உள்ள இந்த நூலின் ஒவ்வொரு பகுதியிலும் சிவதத்துவங்கள் மிக அழகிய பலவித சந்தங்களுடன் - இலக்கிய நயம், சொல் நயமுடனும் விளங்கும் ஸம்ஸ்க்ருத ச்லோகங்களால் விளக்கப் படுகின்றன.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இந்த நூல் முதல் இரண்டு பாகங்கள் (மாஹேச்வர பவ எனும் அம்சங்கள்) மட்டும் 1913-ம் ஆண்டில் சென்னையைச் சேர்ந்த செல்வந்தரும், சிவநெறிச் செம்மலுமாக விளங்கிய சதாசிவ செட்டியார் என்ற அன்பரால் வெளியிடப்பட்டுள்ளன. அவைகளும் இந்நாட்களில் கிடைப்பதற்கு அரிதாகவுள்ளன.

கடந்த 1971-ம் ஆண்டில் நமது நூலகத்தில் அச்சிட்டு வெளியிடப்பட்ட 3, 4, 5, 6 அம்சங்கள் தஞ்சை ஸ்ரீஸ்வாமிநாத ஆத்ரேயர் எனும் ஸம்ஸ்க்ருத பேராசிரியர் அவர்களால் சிறந்த முறையில் பதிப்பிக்கப்பட்டுள்ளன.

மீதமுள்ள பகுதிகளை (7 முதல் 12 முடியவுள்ளவை)ப் பதிப்பிக்கும் பணி 1991-ல் முன்னாள் மாவட்ட ஆட்சியரும், நூலக இயக்குநருமான திரு. சண்முகராஜேச்வரன், இ. ஆ. ப., அவர்களால் எனக்களிக்கப்பட்டது. பிழைகளைத் திருத்தம் செய்து பதிப்பிக்கும் பணி அதுமுதல் இரண்டு ஆண்டுகளில் முடிக்கப்பட்டது.

முதல் அம்சத்தில் - சிவபெருமானைக் குறித்துக் கடும் தவம்செய்த **ஜைகீஷவ்ய முனிவர்** சிவனருள்பெற்று கந்தப் பெருமானை சேவித்தல், சிவநெறிகள்பற்றி பார்வதிதேவியிடம் சிவபெருமான் அருளிச்செய்ததை உடனிருந்து செவியுற்ற கந்தப்பெருமானிடம் சிவதத்துவம்பற்றி விரிவாகக் கூறும்படி ஜைகீஷவ்யர் வேண்டுதல் - நந்திகேச்வரர், ப்ருங்கி முதலான சிவகணத்தைச் சேர்ந்தோரும் திருமால் முதலான தேவர்களும் முனிவர்களும் அடங்கிய அவையில் கந்தப்பெருமான் சிவரஹஸ்யக் கருத்துக்களைக் கூறுதல், ஸத்யோஜாதம் - வாமதேவம், அகோரம் - தத்புருஷன், ஈசானன் எனும் பஞ்சப்ரம்மங்கள் செய்த சிவஸ்துதி - கைலாய வருணனை முதலான கருத்துக்களும்,

இரண்டாம் அம்சத்தில் - பார்வதிதேவி தவமியற்றுதல், சிவபெருமான் அருள்புரிதல், சிவகைலாயம் போன்று பராசக்திக்கென ***சிந்தாமணி த்வீபம்*** அமைத்தல், பராசக்தியின்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

தனி வாசஸ்தலமாக அமைக்கப்பட்ட சிந்தாமணி த்வீப வருணனை, துர்வாஸ முனிவரின் தவம், சக்தி தத்துவ விளக்கம் ஆகியவையும்,

மூன்றாவது அம்சத்தில் - காயத்ரீயின் தவம், சிவ வழிபாட்டின் சிறப்பு, மேரு மலையின் சிறப்பு, வில்வமரத்தின் பெருமை, சிவபூஜை மகிமை பற்றியும்,

நான்காவது அம்சத்தில் - நந்திகேச்வரர், சண்டேசப் பெருமான், ப்ருங்கி, மார்க்கண்டேயர், அகஸ்தியர் முதலானோருக்கு சிவபெருமான் அருள்புரிதல்.

ஐந்தாவது அம்சத்தில் - கேதாரேச்வர, ஓங்காரேச்வர, வைத்தியநாதம், குஸ்ருணேச்வர, நாகநாத, மஹாகால, பீம, த்ரியம்பகேச்வர, விச்வநாத, ஸ்ரீசைல, கோகர்ண, ராமேச்வர எனும் தலங்களில் உள்ள பன்னிரண்டு ஜோதிர்லிங்க வருணனைகளும்,

ஆறாவது அம்சத்தில் - மஹாபாரதத்தில் பகவத்கீதை போன்று வேதாந்த உபநிடதக் கருத்துக்களடங்கிய ருபு கீதையும் கூறப்பட்டுள்ளன.

ஏழாவது அம்சத்தில் - சிவஸஹஸ்ர நாமத்தின் சிறப்பு காசித்தலச்சிறப்பு, புஷ்பதந்தன் எனும் கந்தர்வன் சிவெபருமானைக் குறித்துக் கடுந்தவம் செய்தது, அவர் இயற்றிய "**சிவமஹிம்ன ஸ்தோத்ரம்**" எனும் துதிச்சிறப்பு, சிவபூஜை செய்யும்முறை, காளஹஸ்தித் தலச்சிறப்பு, வேடன் (கண்ணப்பன்) செய்த விநோதமான சிவபூஜையால் அவன் சிறப்புற்றது, சிவாலயத்தில் பிரதக்ஷிணம் செய்யும்முறை, குளிர் காலத்தில் சிவலிங்கத்திற்கு உறைந்த நெய் கொண்டு போர்வைபோல் மூடிவைத்து வழிபடும் "க்ருதகம்பள" வழிபாடுபற்றி, கும்பகோணம், திருவிடைமருதூர் தலச்சிறப்பு, காசி தலத்தில் கடினமான பஞ்சக்ரோச யாத்திரையின் சிறப்பு கூறப்பட்டுள்ளது.

CC-0. SarTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

தற்பொழுது வெளியிடப்படும் எட்டாவது அம்சத்தின் முதல் பாகத்தில் முப்பது அத்யாயங்கள் உள்ளன.

முதல் இரண்டு அத்யாயங்களில் - சித்ராங்கதன் எனும் கந்தர்வன் ஒரு முனிவரின் பெண்ணைக்கண்டு மையல் கொண்டு பலவந்தம் செய்தபோது முனிவரின் சாபத்தால் பிசாசாக அலைந்து சிவபக்தனான தும்புரு எனும் கந்தர்வனின் உதவியால் சிவவழிபாடு செய்து சாபம் நீங்கப் பெற்றதுபற்றி கூறப்படுகிறது. அடுத்த நான்கு அத்யாயங்களில் கந்தப்பெருமான் ஜைகீஷவ்ய முனிவருக்கும் மற்ற பல முனிவர்களுக்கும் சிவ தத்துவ ரகசியக் கருத்துக்களைக் கூறுவதாகவுள்ளது.

6வது அத்யாயத்தில் - கச்யப முனிவருக்கு இரு மனைவியர் விநதா (ஸுபர்ணீ), கத்ரூ என்று. விநதா அருணன், கருடன் இருவரின் தாய். அருணன் சூரியனின் தேரோட்டி. கத்ரு சக்களத்தி உணர்வினால் தூண்டப் பட்டவளாய் ஆதிசேஷன், தக்ஷகன் முதலான ஸர்ப்பங்களின் உதவியால் விநதாவைத் தன் அடிமையாகச் செய்தாள். தேவருலகிலிருந்து அம்ருதகலசத்தைக் கொண்டுவந்தால் அடிமைத்தனத்திலிருந்து விடுவிப்பதாய் கூறினாள். தாயின் நிலைகண்டு வருந்திய கருடன், அம்ருத கலசத்தை எடுத்துவரப் புறப்படும் முன்பாகத் தன் தந்தையைக் காண்கிறார். கச்யபர் சிவபெருமானின் .மகிமையை அறிந்தவராதலால், கருடனிடம் சிவவழிபாடு செய்யுமாறு கூறி வழிபடுவதற்கான வழிமுறைகளும் கூறுகிறார்.

7வது அத்யாயத்தில் - கச்யபர், கருடனிடம் கூறுகிறார். மகனே! தேவருலகில் அம்ருத கலசம் மிகுந்த பாதுகாப்புடன் உள்ளது. வீரர்கள் இரவு பகலாகக் காவல் செய்கிறார்கள். கலசத்தைக் கைப்பற்ற வேண்டுமானால் உபாயங்களைக் கூறுவேன். காயத்ரீயின் மகிமை அளவிடற்கரியது. அதுபோலவே சிவ பஞ்சாக்ஷர மந்த்ரமும் சிறப்புமிக்கது என்று கூறுகிறார்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

8வது அத்யாயத்தில் - கருடன் கச்யபரிடம் பஞ்சாக்ஷர மந்த்ரத்தை உபதேசிக்கவேண்டும் எனக்கேட்க, காயத்ரீ போலவே பஞ்சாக்ஷரமும் தந்தையிடமிருந்தே பெறவேண்டும் எனக்கூறுகிறார்.

9வது அத்யாயத்தில் - சிவ தத்துவங்கள்பற்றி கருடனுக்குக் கூறும் கச்யபர் விபூதி மகிமையைக் கூறுகிறார். தொடர்ந்து,

10வது அத்யாயத்தில் - ஐச்வர்யங்களை அளிக்க வல்லது என்பதால் விபூதி என்றும், அணிவோர் முகத்தில் தனிப்பட்ட ஒளி ஏற்படுவதால் பஸிதம் - பஸ்மா என்றும் அணிவோரின் பாபங்களைப் போக்குவதால் க்ஷாரம் என்றும், பாபங்களைச் செய்வதிலிருந்து தடுத்துக் காப்பதால் ரக்ஷை என்றும் விபூதிக்கு ஐந்துவகைப் பெயர்கள் கூறுகிறார்.

11வது அத்யாயத்தில் - இதில் ருத்ராக்ஷ மகிமை, தோற்றம், ருத்ராக்ஷ வகைகள், ஒன்று முதல் 14 முகங்கள் உள்ளவற்றின் சிறப்புபற்றி விரிவாகக் கூறப்படுகிறது.

12வது அத்யாயத்தில் - சிவ வழிபாடுமுறைபற்றி கூறப்படுகிறது.

13வது அத்யாயத்தில் - வில்வமரம், இதழ் இவற்றின் சிறப்பு கூறப்படுகிறது. ஸ்நானம் செய்யாமல் துளஸி மற்றும் வில்வம் பறிக்கலாகாது. பில்வம் பறிப்பதற்கு முன்பாக, பின்வரும் மந்தரம் சொல்லிவிட்டுத்தான் பறிக்கவேண்டும்.

नमस्ते बिल्ववृक्षाय नवारुणदलाय च ।

पत्रं ते शिवपूजार्थं गृह्णाम्यद्य क्षमस्व मे ॥

'ஹே! வில்வத்தருவே உனக்கு வணக்கம். சிவ பூஜைக்காக உனது இலைகளைப் பறிக்கிறேன். என்னை மன்னிப்பாயாக' என்றும், மூன்று இலைகள் சிவபெருமானின் மூன்று கண்கள் போன்றவை, பல பிறவிகளின் பாபங்களை விலக்கும் சக்தி

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

பெற்ற வில்வ இலைகளால் அர்ச்சனை செய்வது முக்திநிலை தருவது என்றவாறு கூறப்படுகிறது.

14வது அத்யாயத்தில் - ஸ்ரீருத்ர மந்த்ரச் சிறப்பு, சிவ பஞ்சாக்ஷரத்தின் மகிமை,

15வது அத்யாயத்தில் - சிவ ஸ்துதி,

16வது அத்யாயத்தில் - சைவர் எனப்படுகிறவர் யார் என்பதற்கான விடைகள்,

17வது அத்யாயத்தில் - சிவ மகிமை,

18வது அத்யாயத்தில் - கச்யபர், கருடனுக்குப் பஞ்சாக்ஷர மந்த்ர உபதேசம் செய்ததும், கருடன் மேகத்தினின்று வெளிப்பட்ட சூரியன்போல் விளங்குகிறார் என்றும், சிவ பூஜை செய்யும்முறையும் கருடனுக்குக் கூறப்படுகிறது.

19வது அத்யாயத்தில் - சிவ பூஜை செய்யும் முறை பற்றியே இதிலும் கூறப்படுகிறது.

20வது அத்யாயத்தில் - தந்தையை வணங்கிவிட்டுப் புறப்பட்ட கருடன், மேருமலை சென்று மானஸஸரஸில் ஸ்நானம் செய்து, அங்கு சிவபூஜை செய்து, துதித்தது, கண்டு மகிழ்ந்த சிவபெருமான் "வேண்டிய வரம்பற்றிக் கேட்டு, உன் விருப்பம் நிறைவேறும். உன் தாயின் அடிமைத்தனம் விலகும்" என்று அருள் செய்ததுபற்றி.

21வது அத்யாயத்தில் - இதில் கருடன் பயங்கரமாக சப்தமிட்டவாறு அமராவதி (தேவர்களின் தலைநகரம்) சென்றதும், தேவர்கள் பயந்து "இது யார்? என்ன சப்தம்" என்று அறியாமல் ஆயுதங்களைக் கையில் எடுத்துக்கொண்டு புறப்பட்டனர். கருடன் அவர்கள் அனைவரையும் தன்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இறக்கைகளாலேயே சிதறி ஓடும்படிச் செய்து, அம்ருத கலசத்தை எடுத்துக்கொண்டு தம் தாயின் இருப்பிடம் வந்து வணங்கிக் கொடுத்துத் தாயை அடிமைத்தனத்திலிருந்து விடுவித்தான் என்று கூறுவதாக உள்ளது.

22வது அத்யாயத்தில் - அம்ருத கலசம் கருடனால் தூக்கிச் செல்லப்பட்டதால் பயமுற்ற தேவர்கள் திருமாலை அடைந்து, அச்செய்தியினைக்கூற, திருமால், சிவ பக்தனான கருடனை எதிர்கொண்டு ஏதும் செய்வதற்கில்லை. சமாதானமாகப் பேசி சாதிக்கவேண்டும் என்றுகூறி, திருமால் தேவர்களுடன் கருடன் இருக்கும் மேருமலைப் பகுதிக்குச் சென்று, கருடனைப் புகழ்ந்து பேசிய திருமாலின் வரம் தருகிறேன் என்று கூறிய சொல்கேட்ட கருடன், காரியத்தைச் சாதிக்கும் திறமையுள்ள உங்கள் கருத்து பற்றி நான் சிவபெருமானின் அருளால் அறிவேன். சிவ வழிபாட்டின் பயனாகத்தான் நீங்கள் அவரிடமிருந்து சக்ராயுதம் பெற்று போர்களில் வெற்றி பெற்றுள்ளீர்கள், நீங்கள் எனக்கு வரம் தருவதா? நான் வரம் தருகிறேன் உங்களுக்கு என்று கூறுவதாக உள்ளது.

23வது அத்யாயத்தில் - திருமால் கருடனிடம் வரம் கேட்கிறார். உண்மையில் நீ எனக்கு, நான் விரும்பும் வரம் தருவதானால் உன் தாயின் அடிமைத்தனம் விலகுவதற்காக எடுத்துவந்த அம்ருதகலசத்தைத் திரும்பிக்கொடு. தேவர்கள் உணவின்றி துயரப்படுகின்றனர் என்றுகூற, அப்படியே தருவதாகக் கூறிய கருடன் அம்ருதகலசத்தைத் திரும்பிக் கொடுத்தார் எனக்கூறுகிறது.

24வது அத்யாயத்தில் - கருடனால் துயருற்ற ஸர்ப்பங்கள் தம் தாய் கத்ருவுடன் கச்யபரின் ஆசிரமம் சென்று முறையிட்டனர். கச்யபர் அவர்களை சமாதானப்படுத்தி இறந்த சர்ப்பங்களை உயிர்ப்பித்துத் தருகிறேன் என்று கூறி உயிர்ப்பித்துக் கொடுத்தார் என்பதுடன் கருடனின் சிவ பக்திச் சிறப்பையும் கூறுகிறார்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

25வது அத்யாயத்தில் - இதில் கச்யபர் கத்ருவிடம் சர்ப்பங்களுக்குக் கருடனின் தொல்லை ஏற்படாதிருக்க வேண்டுமெனில் சர்ப்பங்கள் அனைவரும் பாதாளம் சென்று ஹாடகேசலிங்கத்தைப் பூஜை செய்யட்டும் எனக்கூறி, பூஜை செய்யும் வழிமுறையையும் கூறியனுப்பிகிறார் எனக்கூறுகிறது.

26வது அத்யாயத்தில் - ஆதிசேஷன் முதலானோர் பாதாளத்தில் ஹாடகேச லிங்கத்தைப் பூஜித்தல், சிவபெருமான் தோன்றி சர்ப்பங்களை அணிகலனாக . அணிந்து அருள்செய்தார் என்று கூறுகிறது.

27வது அத்யாயத்தில் - இதில் ஆதிசேஷன் முதலானோர் நாகரத்னங்களைக் கொண்டு உயர்வான ஆலயம் நிர்மாணித்து, ஹாடகேச லிங்கத்தைப் பூஜிப்பதுபற்றி கூறப்படுகிறது.

28வது அத்யாயத்தில் - இதில் சிவபெருமானைப் பூஜித்த ஆதிசேஷனுக்கு முன்தோன்றி சிவனார் அருள்செய்ததுபற்றி கூறப்படுகிறது.

29வது அத்யாயத்தில் - இதில் சர்ப்ப குமாரர்கள் தக்ஷகன் அனந்தன் முதலானவர்கள் செய்யும் பூஜைமுறை பற்றியும்.

30வது அத்யாயத்தில் - பாதாளத்தில் அஷ்டதிக் கஜங்கள், ஐராவதம், புண்டரீகம், வாமனம், குமுதம், அஞ்ஜன, ஸுப்ரதீகம் முதலானவை சிவபூஜை செய்து பூமியைத் தாங்கும் திறன்பெற்றமைபற்றிக் கூறப்படுகிறது.

இந்த பீம அம்சத்தில் இலக்கணப் பிழைகள் அதிகம் உண்டு என்பதுடன், ச்லோகங்களின் விருத்தம் (Meter) முறைப்படி இல்லை. ஒரு மீட்டரில் ஒரு செய்யுள் தொடங்கினால் முழுவதும் அந்த மீட்டரில் இருப்பதில்லை. இரண்டாம் வரி வேறு மீட்டரில் அமைந்ததாக உள்ளது.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

வியக்கத்தக்க கற்பனையும் சொல்லாட்சியும் ஆசிரியரின் சிறப்பிற்கு எடுத்துக்காட்டாக உள்ளன. திருத்தம் செய்வதற்கு முற்பட்டால் வேறு செய்யுள் எழுதும்படியாகும். அது நூல் முழுவதுமுள்ள குறைகளைக் களைவதும் சாத்தியமற்றதாகும். சிவ தத்துவம் கூறப்படும் முறை மிகமிகச் சிறப்பாக உள்ளது. இவ்வரிய நூலை வெளியிடும் பணி 1992 நவம்பரில் தொடங்கப்பட்டது. டிசம்பர், 1992ல் நிறைவு செய்யப்பட்டது

இச்சிறந்த நூலை வெளியிட அனுமதித்து உத்திரவிட்ட தஞ்சை மாவட்ட ஆட்சித்தலைவர் மற்றும் நூலக இயக்குநர் உயர்திரு. சா. விஜயராஜ் குமார், இ. ஆ. ப., அவர்களுக்கு என் உளம்நிறைந்த நன்றியைத் தெரிவித்துக் கொள்கிறேன். நூலக நிருவாக அலுவலர் மற்றும் வெளியீட்டு மேலாளர் (பொறுப்பு) திரு. சாமி. சிவஞானம் அவர்களுக்கும் என் உளமார்ந்த நன்றியினைத் தெரிவித்துக்கொள்கிறேன்.

சென்னை
1-8-2006

தேதியூர். S. கிருஷ்ணமூர்த்தி சாஸ்திரிகள்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

OUR OTHER PUBLICATIONS

Nauka Charitram	Sanskrit & Tamil	30-00
Sita Kalyanam	Sanskrit & Tamil	35-00
Gayatri Kosam	Sanskrit & Tamil	30-00
Ragaratnakaram	Sanskrit & Tamil	15-00
Dhanyakumaracharitram (Dharmaneri Kathai)	Sanskrit & Tamil	44-00
Kandukapura Mahatmyam	Sanskrit & Tamil	25-00
Ramachinthamani Aaruudam (Nandinagari Catalogue)	Sanskrit & Tamil	25-00
Vruttaratnavali (Chandas Sastram)	Sanskrit & Tamil	30-00
Kalanandakam	Sanskrit & Tamil	55-00
Prabodha Chandrika (Grammer)	Sanskrit & Tamil	70-00
Sirungarakosam	Sanskrit	12-00
Vedasara Siva Sahasram	Sanskrit	80-00
Stotra Ramayanam	Sanskrit	25-00
Mukunda Vilasam	Sanskrit	35-00
Vinatananda Vyayoga	Sanskrit	40-00
Kumaresa Satakam	Tamil	65-00
Lokaswarupam	Tamil	75-00
Kanakkathikaram	Tamil	150-00
ThiruvappanurPuranam	Tamil	50-00
Sowmiya Sagaram	Tamil	70-00
Jatakachandrika	Tamil	40-00
Marathi Lavani Songs	Marathi	35-00
Nakshatra Chinthamani (Part - I)	Tamil	200-00
Nakshatra Chinthamani (Part - II)	Tamil	100-00

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। शिवाय नमः ।।

।। शिवरहस्यम् ।।

।। अष्टमांशम् ।।

।। प्रथमोऽध्यायः ।।

दिङ्नागबृन्दसदृशानननागभूष-
प्रेमास्पदाङ्गमगजानुखपद्ममित्रम् ।
तं नोनुमः प्रणतविघ्नहरं गणेश-
मीशात्मजं शरवणोद्भववन्द्यमाद्यम् ।। १ ।।

श्रीसूतः (उवाच)

जैगीषव्यः प्रणम्यान्यं प्रश्नं चक्रे मुनीश्वराः ।
स्कन्दं नन्दितमन्दारबृन्दं संहृततारकम् ।। २ ।।

जैगीषव्यः (उवाच)

श्रुतं ते तारकाराते आनन्दवनवैभवम् ।
सहस्रनाम यच्छम्भोर्दिव्यं रुद्रसमन्वितम् ।। ३ ।।

क्षेत्राणां महिमा शम्भोः शिवधर्माः सनातनाः ।
विष्णोश्च पुष्पदन्तस्य महिम्नं श्रुतमुत्तमम् ।। ४ ।।

सप्तमांशे कथाश्चित्रास्त्वत्तः शिवतनूभव ।
अष्टमांशे कथाः शम्भोरष्टमूर्तेर्वदस्व मे ।। ५ ।।

M. S. No. 1763 - 9544. T. M. S. S. M. Library, Thanjavur.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शेषेण च तपस्तप्तं शिवपादार्चकेन हि ।
सर्पैश्च पूजितः शम्भुरित्युक्तं प्रथमांशके ।। ६ ।।

कालकालकथाख्यानैर्नेयः कालोऽधुना मया ।
कृपया त्वत्पदाम्भोजमनुलोके वदस्व मे ।। ७ ।।

यथा त्वया श्रुतं देव्या वदनस्पन्दि सन्मधु ।
मच्चित्तभ्रमरो नित्यं पातुमिच्छति षण्मुख ।। ८ ।।

शम्भोश्चरित्रं पापघ्नं वद तारकसंहर ।
त्वत्कृपापात्रभूतो यः स त्रिणेत्रप्रियो भवेत् ।। ९ ।।

श्रुतिश्रवणभूषस्य चरित्रं पातकौघभित् ।
वदैव (तत्) शूरसंहार मारमारप्रियात्मज ।। १० ।।

सूत उवाच

तदानीं शाम्भवस्यास्य वचः श्रुत्वा हरात्मजः ।
अकथिष्टोदन्तमेतं शिपिविष्टकथाश्रयम् ।। ११ ।।

नागैः प्रपूजनं शम्भोर्नागभूषस्य चेशितुः ।
कद्रूसुपर्णीसंवादो गरुडेन पराभवः ।। १२ ।।

शिवधर्मप्रसङ्ख्यानं गरुडाय दृढार्थदम् ।
काश्यपस्य च संवादो गरुडेन मुनीश्वराः ।। १३ ।।

यथापर्णामुखे दूत्यं शिवेन कथितं रहः ।
पुण्यं शिवरहस्याख्यं मधु शैवाङ्गपुष्टिदम् ।। १४ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शाम्भवाः षट्पदा एव तज्जिघृक्षव उत्तमाः ।
मुनिं प्राह तदा स्कन्दो गणेन्द्रानमरोत्तमान् ।. १५ ।।

नमस्कृत्य महादेवमम्बां हेरम्बमेव च ।
दध्यौ चिरं प्रसन्नात्मा स्वहृत्पङ्कजसंस्थितम् ।। १६ ।।

पुरुषं परमेशानं सर्वभूतगुहाशयम् ।
व्याप्य व्यापकताहीनं कारणानां च कारणम् ।। १७ ।।

पतीनां पतिमीशानमुमापतिमनामयम् ।
गणानां च पतिं देवं शिवं गृत्सपतिं प्रभुम् ।। १८ ।।

कुलुञ्चानां पतिं शम्भुं हरं व्रातपतिं विभुम् ।
दिशां च पतिमीशानमुग्रं देवं कपर्दिनम् ।। १९ ।।

अम्बिकेशं पशुपतिं पथीनां पतिमीश्वरम् ।
अन्नानां च पतिं देवं बब्लूशं मीढुषं शिवम् ।। २० ।।

भवोद्भवं महादेवं पुष्टानां पतिमीश्वरम् ।
जगतां पतिमाशास्यं वनानां च पतिं भवम् ।। २१ ।।

क्षेत्राणां च पतिं भीमं वृक्षाणां शर्वमीश्वरम् ।
कक्षाणां च पतिं व्योमकेशं कोशादिवर्जितम् ।। २२ ।।

जगतां चैव विश्वेशमोषधीनां महेश्वरम् ।
पत्तीनां मेरुधनुषं सत्वानां बाणधारकम् ।। २३ ।।

सहमानं महेशानमाव्याधिपतिमीश्वरम् ।
सर्वेषां तस्थुषाणां (षां चैव) च जङ्गमानां पतिं प्रभुम् ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सर्वैश्वर्येण सम्पन्नं नाम्ना सर्वेश्वरं शिवम् ।
अनामरूपं देवेशं सर्वावासं च दूरगम् ।। २५ ।।

सर्वभूतैकशरणं शरण्यं शरणार्थिनाम् ।
महाकारुणिकं साम्बं भक्तानामभयप्रदम् ।। २६ ।।

सर्वेन्द्रियार्थसहितं विषयादिविवर्जतम् ।
सर्वेन्द्रियगुणातीतं सर्वाधारमनामयम् ।। २७ ।।

सर्वस्य प्रभुमीशानं नात्यकिंचिन्तमं (?) स्तवैः ।
ध्यात्वा हृत्पङ्कजे देवमुमया सहितं शिवम् ।। २८ ।।

सर्वेन्द्रियार्थरहितं महानन्दाम्बुमग्नधीः ।
अवशेन जगादेदं स्कन्दो नन्दाम्बुमग्नधीः ।। २९ ।।

स्कन्द उवाच-

लोकानुग्रहविग्रह त्रिजगतां संहारकोग्र प्रभो
यस्तं[1] मामहिनेव सोममगजाकान्तोरुपापात्मना ।
भक्ते चापि भवाननुग्रमनसा पश्याद्य निग्राह्यम-
प्यग्राह्यं शशिशेखरार्चकमहङ्ग्राह्याग्रगण्ये न किम् ।। ३० ।।

आतार्यालाद्य शम्भो भव हर भगवन् रुद्र भद्र त्रिणेत्र
भीमोग्राध्वरदक्षपक्षसुरताऽऽमिक्षाभुजां शिक्षक ।
उक्षाधीश्वरवाह कक्ष[2] वसते शम्भो भगाक्षिक्षय
ध्वाङ्क्षाक्षिप्रभ दक्षदीक्षितमहादीक्षाविनाशाव माम् ।। ३१ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे जैगीषव्यप्रश्ने स्कन्दध्यानं नाम प्रथमोऽध्यायः ।।

यस्तं - Put into trouble. कक्ष - a forest of dead trees.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। द्वितीयोऽध्यायः ।।

स्कन्द उवाच

श्रृणु तूर्णं कृपाम्भोधेः कथाख्यानं मुनीश्वर ।
जैगीषव्य महाशैव जितषड्वैरिविक्रम ।। १ ।।

पञ्चेषुमत्तमातङ्ग हर पञ्चास्यविक्रम ।
अपर्णारमणार्चानां भवानभ्यर्ण एव हि ।। २ ।।

मया षड्वदनाम्भोजश्रवणैः श्रुतमैश्वरम् ।
माहात्म्यं परमेशस्य महिमानं(नो) महाघभित् ।। ३ ।।

दिव्योत्फुल्लमुखाम्भोजमरन्दस्यन्दिसुन्दरम् ।
पुण्यं शिवरहस्याख्यं मधुमुत्तममुत्तमम्[1] ।। ४ ।।

अमृतादपि विप्रेन्द्र सारभूतमिदं ध्रुवम् ।
किं चामृतस्य पानेन नैव मुक्तिर्भविष्यति ।। ५ ।।

एतच्छिवरहस्याख्यामृतपानं विमुक्तिदम् ।
त्वमेव पात्रं विप्रेषु श्रवणे ते धृता मतिः ।। ६ ।।

अमी गणेन्द्रविप्रेन्द्रसुरेन्द्राश्च यथासुखम् ।
आनन्दघनकन्दस्य महिमानं महेशितुः ।। ७ ।।

अस्मिन्नंशे महादेव्यै महेशेनोपवर्णितः ।
भीमोऽष्टमांशः कथितो देवेशस्य प्रसादकृत् ।। ८ ।।

---

1. "मधूत्तममनुत्तमम्" इति सङ्गतः पाठ इति भाति ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भीमेन कथितो देव्यै अघोरास्येन शाङ्कर ।
श्रृणु कर्णसुखाख्यानं सहैभिर्मुनिपुङ्गवैः ।। ९ ।।

चरित्रं तत् त्रिणेत्रस्य पवित्रं पापनाशनम् ।
विचित्रं पुण्यदं स्वर्ग्यं स्मरणादस्य सत्तम ।। १० ।।

श्रृण्वतां श्रवणैस्तूर्णं मुक्तिरेव भविष्यति ।
निस्तीर्णः स तु संसाराद्भवोद्भवकृपारसैः ।। ११ ।।

भविष्यत्येव सहसा भीमपादाम्बुजाश्रयात् ।
यो महेशकथासिन्धुतरङ्गाप्लाविमानसः ।। १२ ।।

स्वमनः पद्मसद्मोत्थसम्फुल्लानन्दमेदुरः ।
भवेज्जन्मसहस्रेषु कश्चिच्छाम्भसत्तमः ।। १३ ।।

भावी भवानीरमणपदध्यानहताशुभः ।
भवत्यत्यन्तभाग्याय भवनाशाय केवलम् ।। १४ ।।

भुक्तिमुक्तिप्रदं पुंसामेतस्य श्रवणं सदा ।
योऽम्शस्याध्यायपादं वा श्लोकार्धं श्रृणुयाद्यदि ।। १५ ।।

स एव शाम्भवो लोके सदा शर्वपदाश्रयः ।
इदमेव परं श्रेयो मङ्गलानां च मङ्गलम् ।। १६ ।।

मङ्गलापदपादाब्जभक्तिदं मुक्तिसेतुदम् ।
अमङ्गलहरं पुंसां पुमर्थदमनुत्तमम् ।। १७ ।।

इदं शिवरहस्याख्यं शशिशेखरभाषितम् ।
देव्यै देवेन कथितमष्टमूर्तिप्रियं सदा ।। १८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नाऽशाम्भवैः श्राव्यमेतद् भावैः[1] श्राव्यमिदं मुने ।
अशाम्भवे वदन् विप्रः शिवद्रोहमवाप्नुयात् ।। १९ ।।

पुरा चित्ररथो नाम गन्धर्वाधिपतिः किल ।
वीर्यवान् बलसम्पन्नः सदास्त्रीजनवल्लभः ।। २० ।।

तरुणो रूपसम्पन्नो गानवृत्तविशारदः ।
पुष्पकेण सदा विप्र सपक्षेण मुदा सदा ।। २१ ।।

पर्यटन् पृथिवीं चैव सुरलोकेषु सत्तमः ।
स गन्धर्वकुलश्रेष्ठो ददर्शाश्रममुत्तमम् ।। २२ ।।

मुञ्जपृष्ठे सदारम्यं फलपुष्पसमाकुलम् ।
लतावितानबहुलं मृगपक्षिगणाकुलम् ।। २३ ।।

हौण्डिर्नाम मुनिस्तत्र उवास शिवभावनः ।
भस्मरुद्राक्षसम्पन्नस्त्रिपुण्ड्रोज्ज्वलफालकः ।। २४ ।।

फालाक्षध्याननिरतः शर्वार्चनपरायणः ।
तादृशैरेव मुनिभिरावृतो हारसत्तमैः ।। २५ ।।

तस्यासीद्रूपसम्पन्ना कन्या कमललोचना ।
रूपयौवनसम्पन्ना सदा सौदामिनीव सा ।। २६ ।।

तां दृष्ट्वा रूपसम्पन्नां चकमे काममोहितः ।
पितुर्लिङ्गार्चनार्थाय पुष्पापचयतत्पराम् ।। २७ ।।

1. भावैः - by learned or worthy men.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वनवाटीषु रम्यासु रहो[1]वाचोरुविक्रमः ।

गन्धर्वः (उवाच)

अयि रम्भोरु कासि त्वं कस्य कन्या वदस्व मे ।। २८ ।।

तावद्य सङ्गमं याचे फुल्लासु वनराजिषु ।
कुसुमेषुशरा(भृशा)र्तं मां परित्रातुमिहार्हसि ।। २९ ।।

इत्युन्मत्तवचः श्रुत्वा गन्धर्वस्य द्विजात्मजा ।
तमाह नम्रवदना भीत्या चालोकयन्(द्) दिशः ।। ३० ।।

कन्योवाच

हौण्डेरहं शाम्भवस्य कन्या गन्धर्वसत्तम ।
तमेव शरणं गच्छ तदादिष्टा त्वया सह ।। ३१ ।।

समन्त्रदत्ता कन्याहं त्वां वरं वरये पतिम् ।
इत्युक्तं स तदा श्रुत्वा तामाकर्षितुमागतः ।। ३२ ।।

मूढो दृढं शरैर्विद्धो मारस्य नितरां मुने ।
सा भीता प्राद्रवद्वेगात्त्यक्त्वा पुष्पाणि कन्यका ।। ३३ ।।

पितरं साश्रुपूर्णाक्षी प्राह गन्धर्वचेष्टितम् ।
तदा स शाम्भवो हैण्डिः शशाप मुनिसत्तमः ।। ३४ ।।

हौण्डिरुवाच

यस्मान्मत्कन्यकां पाप प्राधर्षीः काममोहितः ।
अपस्मारगृहीतस्त्वं भवेति मुनिराह हि ।। ३५ ।।

स गन्धर्वो मुनेः शापान्मदोन्मत्तो विचेतनः ।
बभ्राम स पिशाचार्तो वदन्नुन्मत्तवत्तदा ।। ३६ ।।

रहः उवाच उरुविक्रमः इति वक्तव्येऽयं शब्द प्रयोगः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सखा तस्याभवद्विप्र तुम्बुरुः शिववल्लभः ।
कैलासे शङ्करं नत्वा तस्य निष्कृतिमाह वै ।। ३७ ।।

तुम्बुरुः (उवाच)

शम्भो विश्वेश विश्वात्मन् सखा चित्ररथो मम ।
तेन शाम्भववर्यस्य कन्यापहृतचेतसा ।। ३८ ।।

अनुष्ठितमिदं शम्भो तमुद्धर महेश्वर ।
भगवानपि देवेशस्तुम्बुरुं प्राह हर्षितः ।। ३९ ।।

ईश्वरः (उवाच)

मद्द्रोहशाम्भवद्रोहावुभौ तुल्यौ हि तुम्बुरो ।
तस्मात्त्वद्भावितः प्रीत्या तद्गन्धर्वविमोचने ।। ४० ।।

उपायमेकं वक्ष्यामि मन्त्राम्नां स्मृतिमात्रतः ।
अपस्मारग्रहान्मुक्तः स भविष्यति तुम्बुरो ।। ४१ ।।

इत्थं शम्भोर्वचः श्रुत्वा स प्रणम्य महेश्वरम् ।
ययौ चित्ररथो यत्र स्थितोऽपस्मारसंयुतः ।। ४२ ।।

उन्मत्तभूतो विकृतकराळोन्नतकेशवान् ।
तं बद्ध्वा वल्लकीहस्तो जगौ कर्णरसायनम् ।। ४३ ।।

तुम्बुरुः (उवाच)

शर्व गर्वपरिपूरितकाम-
स्तोमबाणविनिवारक शम्भो ।
त्वत्पदाब्जकलनेन न कालः
कामकाय दमनाव्ययमूर्ते ।। ४४ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्रीमत् त्रियम्बक सदाशिव वेदवेद्य
वैद्योत्तम प्रथमनाथ सुरासुरेड्य ।
श्रीविश्वनाथ मम नाथ समुद्धराशु
दुर्वारपापदवदग्धमिमं कृपालो ।। ४५ ।।

स्वर्णवर्णकृतनेत्रकर्णजा-
पारहार गगनान्तरसंस्थ ।
ऊर्णनाभिरिव त्वद् गतमेत-
ज्जागतं विसृजसेऽत्सि च तूर्णम् ।। ४६ ।।

शम्भुकर्णभरित स्तुतिजाते
भद्रकर्णकृतशङ्खनिनादैः ।
नन्दिवाद्यभरतानुगताप्लैः
नृत्तरङ्गमपि ते हृदयान्तः ।।

इत्थं तत्स्तुतिजातेन वीतपापोऽभवत्क्षणात् ।
स तु चित्ररथो विप्र क्षणाद् गन्धर्वरूपधृक् ।। ४८ ।।

एवं कथाप्रभावेण नाम्नां शम्भोः प्रसादतः ।
नन्दी(न्दि)भृङ्ग्यादयोऽप्येवं समाराध्य महेश्वरम् ।। ४९ ।।

गणेशत्वं च सम्प्राप्य मोदन्ति शिवसन्निधौ ।
तमाह विनयानम्रं नन्दिकेशं महेश्वरः ।। ५० ।।

ईश्वरः

स्कन्दे विघ्नाधिपे वा तव सदृशगुणं नाभिनन्दामि नन्दिन्
विश्वानन्दप्रदस्त्वं मम तनयवरो देवसङ्घैकवन्द्यः ।

CC-0. SarasvatiMahal Series. Digitized by Sri Muthulakshmi Research Academy

गौर्याश्चापि प्रियस्त्वं तव शतयजुषां सारजप्यैः प्रियं मां
विद्धि त्वय्येव रक्तं गणवरविनुतं सत्यमित्यब्रवीत्तम् ।। ५१ ।।

मत्सारूप्यधरो वसाद्य हृदयद्वारे च कैलासके
प्राप्तो मद्‌गणपुङ्गवस्य पदवीं हस्ताग्रवेत्राग्रधृक् ।
विष्णुब्रह्ममहेन्द्रमुख्यमकुटीनीराजिताशा हि ते
लोकेषु प्रचरिष्यतीति निपुणं त्वं मे शरीरं परम् ।। ५२ ।।

नन्दी (उवाच)

भस्माभ्यक्ततनुर्भवे भसितयुक्पुण्ड्राङ्कगात्रो भवे,
भावोऽक्षादिविभूषितः शिवमुनिव्याहारमात्रादरः ।
रुद्राध्यायजपानुरक्तहृदयो लिङ्गार्चने सादरो
भूयां जन्मशतेषु एषविहितस्त्वत्पादपद्मेऽञ्जलिः ।। ५२ ।।

इत्थं नन्दिवचः सुनन्दितहृदा स्मेराननः शङ्करः
प्राहानन्दभरेण वाक्यमधुना संवीक्ष्य पूर्वोदितम् ।
तन्मूर्ध्नि स्वकराम्बुजं च विदधन्नुच्चैर्वदन्तं हरः
सर्वेषामुपश्रृण्वतां सुरगणेन्द्राणां मुनीनामपि ।। ५४ ।।

एवं प्रदक्षिणविधौ निरतः स भृङ्गी
भृङ्गोपमो रविरिवोदयपर्वतेन्द्रे ।
स्तुत्या च तोष्य भगवन्तमुमासहायं
लेभे गणेन्द्रपदवीमितरातिदूराम् ।। ५५ ।।

स्कन्दः (उवाच)

पुंसां पुमर्थदमनुत्तममीशपाद-
ध्यानानुरक्त हृदयैः परिसेवनीयम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मान्यं च धुर्यमिदमेव वदान्यधुर्य-
माधुर्यधुर्यवचनैः परमेव सारम् ।। ५६ ।।

पुण्यं परं शिवरहस्यमधु प्रकृष्ट-
मुत्कृष्टभक्तिजनकं शिपिविष्टपादे ।
कष्टानि नाशयति पुष्टिमिदं ददाति
पुष्टिं प्रयच्छति सदैव विमुक्तिगृष्टिः ।। ५७ ।।

भ्रष्टश्रियामपि सदैव तनुप्रकृष्ट-
मुत्कृष्टराजतनयाधिकसौख्यदायि ।
किं भोगभाग्य निकरैर्वरदन्तिबृन्दै-
र्वाज्युत्तमैर्वरथैर्धनधान्यगोभिः ।। ५८ ।।

किं नश्वरैर्वरमहेश्वरभक्तिभावं
वाञ्छन्ति नैव सुकुतैरकृतैः कृतार्थाः ।।

।। इति श्रीशिवरहस्ये अष्टमांशे चित्ररथशापनिवृत्तिर्नाम
द्वितीयोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। तृतीयोऽध्यायः ।।

स्कन्द (उवाच)

श्रृणु त्वमगजाकान्तपादभक्तिविवर्धनम् ।
भवभक्तिकथोदारं वरं मधु महाघभित् ।। १

हृत्तमोवारणं सद्यो मुक्तिकारणमद्‌भुतम् ।
त्वत्तो न पात्रमुद्दिश्य ग्रहणे धारणे मुने ।। २ ।।

रहस्यमेतद्‌भगवानगजापतिरेव हि ।
कैलासे स्वाङ्कसंस्थायै प्रीत्या प्राह स शङ्करः ।। ३ ।।

तदन्तिकस्थेन मया श्रुतमेतद्वदामि ते ।
अष्टमूर्तेः प्रियं चैतदष्टमांशमिदं तव ।। ४ ।।

कथयिष्ये मुनिश्रेष्ठ श्रृण्वेभिर्मुनिपुङ्गवैः ।
श्रवणेऽधृतोऽसि त्वं भवानेवमतोऽद्य मे ।। ५ ।।

कुरु चित्तमिहैकाग्रमुग्राख्यानं मनोहरम् ।
भावानां भवशान्त्यर्थं भवेनैव प्रकाशितम् ।। ६ ।।

भवेद्‌भवचरित्रेषु विश्रान्ताः किल शाङ्कराः ।
अविश्रान्तमुमाकान्त कथया श्रान्तिवर्जिताः ।। ७ ।।

भवतान्ता अपि सदा नितरां शान्तमानसाः ।
क्षणं त्र्यक्षप्रसादेन कुरु कर्णे कथारसम् ।। ८ ।।

तूर्णमभ्यर्णमामुक्तिर्भविष्यति कृपावशात् ।
शम्भोर्विचित्रलीलस्य महेशस्य पिनाकिनः ।। ९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स गौरीहृदयानन्द आनन्दाम्बुनिधिः स्वयम् ।
भक्त्या भक्तैः स्तुतो नित्यं वेदवेद्यो महेश्वरः ।। १० ।।

ददाति मोक्षसाम्राज्यं प्राज्यं देवशिखामणिः ।
राज्यं वा शिवभक्तानां मन्नामाज्यप्लुतं सदा ।! ११ ।।

वाणीपतेरयं प्रादाद्वेदजालं कृपाबलात् ।
शर्वाणीपतिरेवाथ चारुचन्द्रलसच्छिराः ।। १२ ।।

रमारमणहारीशः स गौरीरमणो हरः ।
ददात्येव हि भक्तेषु शाम्भवेषु कृपावशात् ।। १३ ।।

स एव गीयते वेदैर्वेदान्तैरपि शङ्करः ।
स एव सर्वदेवेशो मृत्युञ्जय उमापतिः ।। १४ ।।

स एव भगवाञ्छम्भुः श्रुतश्चाथर्वणे शिवः ।
यस्यैश्वर्यस्य नान्तोऽस्ति सर्वगः सर्वदा प्रभुः ।। १५ ।।

यद्ध्यानेन परा मुक्तिः सुलभा शाम्भवोत्तमे ।
स गौरीरमणो देवः कालकामान्धनाशनः ।। १६ ।।

स तु मृत्युञ्जयो नित्यमपारविभवाश्रयः ।
यस्य प्रसादलेशेन विष्णुब्रह्मेन्द्रपूर्वकाः ।। १७ ।।

धिष्टितानि वृताः सर्वे शिपिविष्टपदार्चकाः ।
उदारतरगम्भीरो भवमायामलापहः ।। १८ ।।

सर्वदुःखहरो देवो रुद्रो वै नीललोहितः ।
य एनं विदुरीशानं अमृतास्ते सदा मुने ।। १९ ।।

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अथेतरे दुःखमेव प्राप्नुवन्ति पदे पदे ।
यस्य वामाङ्कगा देवी या सा सर्वेश्वरी शिवा ।। २० ।।

यन्मायया मोहिता वै ब्रह्मेन्द्राश्चाप्यधोक्षजः ।
यस्याः प्रसादलेशेन[1] न जानन्ति महेश्वरम् ।। २१ ।।

स्वात्मानं सर्वगं शान्तं सच्चिन्मयमुमाधवम् ।
यस्य पुत्रो गणाधीशः सर्वविघ्ननिवारकः ।। २२ ।।

यस्य पुत्रोऽहमेवाद्य साक्षाज्ज्ञानात्मको मुने ।
यस्य नन्द्यादयो विप्रगणः शाङ्करपुङ्गवाः ।। २३ ।।

यस्य धर्मो महाबाहो युगपादोऽमितद्युतिः ।
यस्याष्टमूर्तिभिर्व्याप्तं जगदेतच्चराचरम् ।। २४ ।।

यस्य लिङ्गं सदा कालं पूजयन्ति मरुद्गणाः ।
बलप्रमथनं साम्बं भक्तसंसारमोचकम् ।। २५ ।।

कारणम् जगतामीशमानन्दघनमद्वयम् ।
यो वै रुद्रो महादेवः शङ्करः शशिशेखरः ।। २६ ।।

यो वै रुद्रो महादेवः भूतं भव्यं भवज्जगत् ।
विश्वं भूतं च भवनं विचित्रं स हि शङ्करः ।। २७ ।।

भीमो रुद्रो महेशानो गीतश्रुतिषु स स्थिरः ।
सर्वाभयप्रदो विप्रो विश्वाधिक उमासखः ।। २८ ।।

पतित्वेन स्तुतो वेदैः सर्वेषामेव शङ्करः ।
भयापहोऽयं भक्तेषु शाम्भवेषु महात्मसु ।। २९ ।।

1. "विना" इति अध्याहार्यम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सर्वोपास्यो ह्यमेयात्मा सर्वेषां हृदयान्तरः ।
सर्वभूतगुहावासो वासिताजगतां त्रये ।। ३० ।।

ईशावास्यमिदं सर्वं जगत् त्रिभुवनात्मकम् ।
यस्य रूपं च पृथिवी सूर्यचन्द्रमसौ मुने ।। ३१ ।।

पृथिवीदेवताः सर्वा न विदन्ति महेश्वरम् ।
प्रियोऽयं सर्वभूतेषु नास्त्यस्माज्जगदेव हि ।। ३२ ।।

स्कन्द उवाच

विभ्राजमानमिदमेतददभ्ररूप-
मुद्भ्रान्तचित्तकुदशा जगदेव सत्यम् ।
विभ्राजतेऽभ्रछदिव हृदभ्रगोष्ठी-
नटस्य चरणार्चनहीनदृष्टेः ।। ३३ ।।

नो विष्णुर्नोविधाता हरिसुरनिकराभूसुरा भासुरा ये
वीरा वाप्यसुराः सुकिन्नरवराः संसारकारगृहे ।
भ्राम्यन्तोऽपि न जानते शिवपदं किं तु प्रसादाद्विभोः
नो बिभ्यन्ति (?)भयेषु शङ्करपदध्यानानुरागादराः ।। ३४

।। इति श्रीशिवरहस्ये अष्टमांशे तृतीयोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। चतुर्थोऽध्यायः ।।

स्कन्द उवाच

विज्ञानात्मा परात्मायं सर्वात्माऽयं महेश्वरः ।
येषां तु हृदयाराम एव भूतपतिः शिवः ।। १ ।।

स एव परमानन्दो रसोऽयममृतो हरः ।
एष विप्रैर्महादेवः सर्वदाभीष्टदो मुने ।। २ ।।

एनमेके वदन्त्यग्निं ब्रह्माणं हरिमिन्द्रकम् ।
एको रुद्रो महादेवो न द्वितीयोऽस्ति कश्चन ।। ३ ।।

ऋतं सत्यं परं ब्रह्म पुरुषः कृष्णपिङ्गलः ।
ऊर्ध्वरेता विरूपाक्षो विश्वरूपो महेश्वरः ।। ४ ।।

यो वेदादौ स्वरः शम्भुः वेदान्तेषु प्रतिष्ठितः ।
ईशानः सर्वविद्यानां सर्वभूतादिरीश्वरः ।। ५ ।।

ब्रह्मविष्ण्वादि देवानामधिपो विश्वतोमुखः ।
जनिता ब्रह्मविष्णूनां रुद्रेन्द्राणां महेश्वरः ।। ६ ।।

यमानिलानलार्काणां दिवः पृथ्व्या महेश्वरः ।
ब्रह्माणं यो व्याधादग्रे तस्मै वेदानुपादिशत् ।। ७ ।।

विश्वतश्चक्षुरीशान विश्वतो बाहुरीश्वरः ।
विश्वतः पाणिपादोऽयं सहस्राक्षः सहस्रपात् ।। ८ ।।

अत्यतिष्ठदिदं सर्वमीशानोऽयं दशाङ्गुलम् ।
यद्भूतं यच्च वै भव्यं वर्तमानं महेश्वरः ।। ९ ।।

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एतावानस्य महिमाऽतो ज्यायांश्च पूरुषः ।
भीषैव पवते वायुः भीषैवोदेति भानुमान् ।। १० ।।

भीषैव अग्निरिन्द्राद्या मृत्युर्धावति भीतितः ।
अपाणिपादो जवनो ग्रहीताऽचक्षुरीश्वरः ।। ११ ।।

स वेत्ति वेद्यजातं च न तं वेत्तीह कश्चन ।
तमाहुरेकं पुरुषं ज्योतिषां ज्योतिरीश्वरम् ।। १२ ।।

हिरण्यबाहुमीशानं सर्वाङ्गेण हिरण्मयम् ।
एषोऽन्तरादित्यगतो नीलग्रीवो विलोहितः ।। १३ ।।

बभ्रुश्चायं महादेव उग्रेऽयं च सुमङ्गलः ।
यो वै रुद्रः स भगवान्गीतश्चाथर्वणोत्तमैः ।। १४ ।।

अन्नानां च पतिः शम्भुः क्षेत्राधिपतिरीश्वरः ।
मित्राधिपो महादेवस्तथा धनपतिः शिवः ।। १५ ।।

भूमानन्दघनो ह्यात्मा सामगीतो महेश्वरः ।
एष ब्रह्मैष एवेन्द्रः ऋग्भिर्गीतो हरोऽव्ययः ।। १६ ।।

नमस्ते रुद्र इत्यादिवाक्यैश्च यजुषोद्भवैः ।
इतिहासपुराणेषु ईशो गीतः पुरातनैः ।। १७ ।।

महोपनिषदांसारैरयमेव हि गीयते ।
भिद्यते हृदयग्रन्थश्छिद्यते सर्वसंशयः ।। १८ ।।

हृत्तमोनाशनं तस्य ज्ञानादेव हि जायते ।
न प्राणो न मनश्चायमसङ्गी सङ्गिवत् स्थितः ।। १९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सहैव सन्तमप्येनं न देवा न महर्षयः ।
न विदुर्ब्रह्मविष्णवाद्याः सेन्द्ररुद्रार्कवायवः ।। २० ।।

स ध्येयः परमेशान आकाशे दहरे हरः ।
सर्वे भीताः प्रमुह्यन्ति द्यावाभूम्योर्य आन्तरः ।। २१ ।।

अनन्तो ह्यव्ययात्मायं पुरुषः प्रकृतेः परः ।
यमज्ञात्वा महादेवं मोहिताः ससुरासुराः ।। २२ ।।

आत्मानं मन्यते[1] सर्वे देहाहङ्कारसंवृताः ।
मायया देवदेवस्य चित्रलीलस्य वर्णिनः ।। २३ ।।

जितमायः स एवेश स कारणमुमापतिः ।
स नित्यो नित्यभूताना चेतनानां स चेतनः ।। २४ ।।

स कारणं कारणानां पतीनां पतिरीश्वरः ।
जगतः कालरूपस्य कालकालो महेश्वरः ।। २५ ।।

महाग्रासोऽयमीशानो यस्योदनमहर्निशम् ।
ब्रह्मक्षत्रात्मकं विश्वं मृत्युर्यस्योपचेतनम् ।। २६ ।।

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानुषाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ।। २७ ।।

यदा तमस्तन्न दिवा न रात्रिः स शिवः स्वयम् ।
स चाक्षरो नित्यमात्मा विधाता परमोऽसदृक् ।। २८ ।।

---

1. व्याकरणनियमा बहुत्रानादृताः । मन्यन्त इति वक्तव्ये मन्यते इति प्रयोगः कृतः । छन्दोभङ्ग प्रसङ्गेनात्रनियम उल्लिङ्घितः । एतादृशाः प्रयोगा रामायणादिष्वपि न दृश्यन्ते ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रपञ्चपञ्चीकरणे निरता ये शिवं विना ।
ते वञ्चिता महेशेन सर्वे चैव सुरासुराः ।। २९ ।।

परवञ्चक ईशानो देवदेवस्त्रिशूलभृत् ।
य एनं विदुरीशानममृतास्ते भवन्ति वै ।। ३० ।।

अथेतरे दुःखयुक्ताः संसारवशवर्तिनः ।
जरामरणसंयुक्ताः षड्वैरिपरिमोहिताः ।। ३१ ।।

देहात्मवादिनः सर्वे दूषणाभिर्विमोहिताः ।
तापत्रितयमध्यस्था भ्रान्तिमोहसमाकुलाः ।। ३१ ।।

जायन्ते च म्रियन्ते च कीटा इव सुरा नराः ।
वानरा इव सर्वेऽपि पामरा दुःखभागिनः ।। ३२ ।।

यस्य रूपं मुने सर्वं जगदेतच्चराचरम् ।
भूमिरापोऽनिलो वायुराकाशं व्योमकेशभाक् ।। ३४ ।।

के हि तद्देवदेवस्य महिमानं पिनाकिनः ।
यजन्ति यागैर्नियता यजमाना महेश्वरम् ।। ३५ ।।

भिक्षवः कक्षवत्सन्ति वेदान्तैश्च विजानते ।
योगिनो युञ्जते योगं यद्विज्ञानार्थमेव हि ।। ३६ ।।

नानावर्णाश्रमैर्धर्मैरिष्टापूर्तैरुपासते ।
मन्त्रैर्मन्त्रविदः साम्बमुपासन्ते महेश्वरम् ।। ३७ ।।

लेभिरे स्वपदान्येव यस्य लिङ्गार्चनेन हि ।
ब्रह्मविष्ण्वादयो रुद्रा मुनयो मनवः सुराः ।। ३८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

असुरा नृपवर्याश्च गन्धर्वाप्सरसोरगाः ।
विपद्भिः(द्भ्यो)मोचिता एव सम्पद्भिश्च नियोजिताः ।।

सर्व विश्वाधिकस्यैव निःश्वासाज्जायते जगत् ।
जातं च वर्धते नित्यं स्थीयते लीयतेऽस्ति च ।। ४० ।।

यस्याष्टमूर्तिभिर्व्याप्तं जगदेतत् त्रिशूलिनः ।
अग्निः शिव उमा सोमो आभ्यां व्याप्तं जगत् त्रयम् ।। ४१

अग्नीषोमात्मकं विश्वं जानन्ति परमर्षयः ।
न देवाङ्कयुतं चैव भगलिङ्गाङ्कितं सदा ।। ४२ ।।

पुंप्रकृत्योरिदं रूपं तस्माच्छिवमयं जगत् ।
अनङ्गमातङ्गहरो हाराणां हृदये स्थितः ।। ४३ ।।

स परः पुरषः प्राणः परमात्मा सदाशिवः ।
अद्वैतोऽयं चतुर्थोऽयं पञ्चकोशातिगोह्ययम् ।। ४४ ।।

यस्माद्ब्रह्मा तथा रुद्रो विष्णुर्विश्वं प्रजायते ।
सर्वमन्यत्परित्यज्य ध्येयः साम्बस्त्रिलोचनः ।। ४५ ।।

उमासहायो भगवान्मायाया ईश ईश्वरः ।
मङ्गलापतिरीशानो भक्तानां मङ्गलप्रदः ।। ४६ ।।

अमङ्गलं हरत्येव भक्त्या भक्तैरुपासितः ।
सर्वेश्वरो महादेवः सर्वैश्वर्यसमन्वितः ।। ४७ ।।

जितमायो महादेवस्तन्मायाविजिताः सुराः ।
क्षेत्राणां च पतिर्देवः पशुपाशविनाशकः ।। ४८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

माया पाशैर्निबध्नाति जगत्ससुरमानुषम् ।
मोचयेदम्बिकानाथः पशुभ्यः सचराचरम् ।। ४९ ।।

भक्त्या प्रसादितो देवः साक्षात्पशुपतिः शिवः ।
यस्य निःश्वसनं वेदानामनन्ति मुनीश्वराः ।। ५० ।।

यः सोमभारैरिज्येत सोमः सोमार्धशेखरः ।
पार्वतीनायको नेता स्थावरस्य चरस्य च ।। ५१ ।।

यस्यांशलेशं हि जगत् भूतं भावि भवत्तथा ।
सर्वं शिवमयं विश्वं नाशिवं विद्यते मुने ।। ५२ ।।

सूतः

सर्वं शिवात्मकतया प्रतिभाति विश्वं
विश्वात्मकस्य कृपया खलु सर्वमेतत् ।
जानीहि शम्भुकृरया परिवर्ततेदं
भूम्यब्धिकाननसुरासुरमानवं च ।। ५३ ।।

नान्यद्भूतभवं जगत्सुरनरं क्ष्माप्तेजवाय्वादिखं ।
ज्योतिर्जालजलं जडाजडजगद् द्यावापृथिव्योत्तराम् ।।

ईशावास्यमिदं तदेव विहितं व्याप्यं व्ययं व्यापकं
चैकानेकपरम्पराप्रमुदितं जानीष्व सर्वं शिवम् ।। ५५ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे चतुर्थोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। पञ्चमोऽध्यायः ।।

जैगीषव्यः उवाच

धन्योऽस्म्यहं तारकारे श्रुतं सार्वात्म्यमीशितुः ।
तत्वोपनिषदं सोमं पृच्छामि पुरुषं पुनः ।। १ ।।

कथमीशस्य चरितं विस्मयावहमुत्तमम् ।
सर्वे सुरनराः सर्वे मुनयश्च तपोधनाः ।।

चित्रलिङ्गस्य देवस्य विश्वेशस्य कृपावशात् ।
तरन्ति दुस्तरं स्कन्द अघोरं भवसागरम् ।। ३ ।।

यत्कृपालेश सम्भूतं जगदेतच्चराचरम् ।
महाकारुणिकः शम्भुः सर्वेषां च प्रसादकृत् ।। ४ ।।

कथं देवस्य चरितं वद मह्यं कृपावशात् ।
नूनं मे (मद्) विस्मयप्राप्तिहेतुकं भक्तिवर्धनम् ।। ५ ।।

उमापतिपदाम्भोजभक्तिदं मुक्तिदं मम ।
वद त्वं तारकाराते कथां कथय मे शुभाम् ।। ६ ।।

सहैभिर्मुनिभिश्चैव गणेन्द्रैः सुरसत्तमैः ।
श्रोतुमुत्कण्ठितं चेतस्तन्मह्यं कृपया वद ।। ७ ।।

सूतः

इत्युक्तं तद्वचः श्रुत्वा मुनिं स्कन्दोऽभ्युवाच ह ।
महेश्वरस्य चरितं श्रृण्वतामघनाशनम् ।। ८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स तु षड्वदनाम्भोजसम्भवैर्लोचनोत्पलैः ।
कृपावलोकनेनैव वीक्ष्य शाम्भवपुङ्गवम् ।। ९ ।।

गणेशानमरेन्द्रांश्च प्रशस्याह प्रसन्नवान् ।

स्कन्द उवाच

भवत्सु नैव गोप्यं मे शाम्भवेषु महात्मसु ।। १० ।।

ईशाङ्गसङ्गो भङ्गाय दुःखानामेव केवलम् ।
भवतीशप्रसादेन भवनाशो महामुने ।। ११ ।।

शम्भोः कथाकर्णनेन कर्णौधन्यतरौ तव ।
मम वक्त्राणि धन्यानि लोचनावलिरेव मे ।। १२ ।।

शिवलिङ्गालोकनेन कैलासे शङ्करालये ।
तूर्णमभ्यर्णगा मुक्तिरपर्णापतिपूजया ।। १३ ।।

पापारण्यमहादावः शङ्करस्यैव पूजनम् ।
न विना शङ्करस्यार्चां संसारोत्तारणं भवेत् ।। १४ ।।

भस्माङ्गरागो यो भूयाद्भावो[1] भवपदार्चकः ।
भावभावं भजत्येव भाव एव हि भाग्यवान् ।। १५ ।।

शङ्गलिङ्गार्चनेनैव पापभङ्गः प्रजायते ।
अनङ्गमातङ्गहरपादार्चकजनप्रियः ।। १६ ।।

भवत्येव विशेषेण शाम्भवो भुवि भाग्यवान् ।
महादेवस्मृतिः सद्यो विद्योतयति तं नरम् ।। १७ ।।

1. भावः = भवस्य शम्भोः अयं भावः शाम्भवः शिवभक्तः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सुरं वा किन्नरं वापि उरगं यक्षमेव वा ।
गन्धर्वं गरुडं वापि कीटं पतगमेव वा ।। १८ ।।

करोति शङ्करकृपा मोक्षायैव न संशयः ।
न किं ददाति साम्राज्यं प्राज्यं भक्तेषु केवलम् ।। १९ ।।

यदुदारकथासारसारसानां महात्मनाम् ।
भवन्ति सम्पदो नित्यं सर्वेषु सुखहेतवे ।। २० ।।

भावैकसुलभो देवो भक्तवश्यो भयापहः ।
भावग्राह्योह्यनिग्राह्य इत्याहाथर्वणी श्रुतिः ।। २१ ।।

तेनैव सर्वमुक्त्यर्थं सृष्टं शङ्करपूजनम् ।
नास्त्यन्यत्तारणं नृणां विना विश्वेशपूजनम् ।। २२ ।।

कः सन्तरेत भवदामसारां सारवासनाम् ।
तां मृत्युञ्जयपूजार्थमुपयुज्य सुखी भवेत् ।। २३ ।।

तां विनान्यत्र धर्मेज्याकरणे मास्तु ते पदम् ।
श्रीमृत्युञ्जयपूजैव सुलभा मोक्षदायिनी ।। २४ ।।

न पूजा पूजकोवाऽस्य स्वतन्त्रस्येश्वरस्य हि ।
किं तु सर्वाभयार्थं हि सृष्टं वै लिङ्गपूजनम् ।। २५ ।.

लिङ्गेऽर्चितो महादेवो ददाति विपुलां श्रियम् ।
विमुक्तिजनकं ज्ञानं ददात्येव महेश्वरः ।। २६ ।।

यः सकृद्बिल्वपत्रेण द्वित्रैर्वा पूजयेद्भवम् ।
भवो भवहरो भूयाद्भावानां नात्र संशयः ।। २७ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यस्य सम्पूजनादेव ब्रह्मविष्ण्वादयः सुराः ।
सेन्द्राः सवरुणा देवा निवसन्ति त्रिविष्टपे ।। २८ ।।

असुरा यक्षरक्षांसि मुनयो मनवस्तथा ।
प्रियं लिङ्गार्चनं शम्भोर्नान्यत्किञ्चिन्मुनीश्वर ।। २९ ।।

न दानैर्नैव तपसा न वर्णाश्रमधर्मतः ।
एतद्धि सार्थकं श्रौतं श्रीमहादेवपूजनम् ।। ३० ।।

विश्वेशपूजया विश्वं सर्वं सम्पूजितं भवेत् ।
विश्वाधिको महादेवः सर्ववेदान्तसंस्तुतः ।। ३१ ।।

स्मृतः सम्पूजितो नित्यं ध्यातो वा मुक्तिदायकः ।
दर्शनं स्पर्शनं लङ्गे "अयं मे" इति मन्त्रतः ।। ३२ ।।

सर्वपापक्षयायैव मुक्तये भवते नृणम् ।
यो महेशं सकृद्ध्यात्वा स्वहृदम्भोजमध्यगम् ।। ३३ ।।

उमासहायं त्र्यक्षं च नीलकण्ठं स सत्यभाक् ।
मान्यः सुराणां सर्वेषां मुनीनामपि वै मुने ।। ३४ ।।

मन्ये महामन्युसमो न देवः करुणाकरः ।
अपराधिषु भक्तेषु सहमानः स एव हि ।। ३५ ।।

चुलुकं जलमात्रं वा त्रुटितं बिल्वजं दलम् ।
ददाति नियमाद्यो वै तस्मै मुक्तिं प्रयच्छति ।। ३६ ।।

ब्रह्मादिदुर्लभं ज्ञानं ददात्येव महेश्वरः ।
विश्वनाथो ह्यनाथं तं सनाथं कुरुते नरम् ।। ३७ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स्वभक्तं मन्मथारातिरनाथजनवत्सलः ।
तस्यैव भक्त्या सुलभो मोक्षो नो धर्मकोटिभिः ।। ३८ ।।

तस्येशस्य प्रसादार्थं सृष्टा हि विविधाः क्रियाः ।
जपहोमार्चनध्यानव्रतकृच्छ्राणि सत्तम ।। ३९ ।।

योगः साङ्ख्यं च तन्त्राणि स्मृतयो निगमा अपि ।
आगमाश्चापि विविधा यन्त्रतन्त्रपराणि च ।। ४० ।।

श्रुतयः स्मृतयः सर्वा वर्णाश्रमनिबन्धनाः ।
बन्धनायैव सर्वेषां न मुक्त्यै(क्तेः) कारणं (साधनं) भवेत् ।।

प्रसादकारणान्येव न प्रसादो भवेद्धि तैः ।
प्रसादकारणं शम्भोर्भक्तिर्या निश्चला शिवे ।। ४२ ।।

भक्त्यैव भवपाशेभ्यो मोचनं जायते नृणाम् ।
भक्तिरेव विरूपाक्षे सदा कार्या मुनीश्वर ।। ४३ ।।

भस्माभ्यक्ततनुर्भावो भवलिङ्गं समर्चयन् ।
कालमृत्योश्च मुच्येत संसारोद्धतसर्पतः ।। ४४ ।।

रुद्राक्षमालाभरणो रुद्रसूक्तजपादरः ।
पञ्चाक्षरपरो नित्यं सर्वदा शिवपूजकः ।। ४५ ।।

स एव मुक्तिकान्तायाः पतिरीशेन कल्पितः ।
रुद्रक्षेत्रादिनिरतो विरतो भवसागरात् ।। ४६ ।।

जागरुकः सदाऽतन्द्रो भवतीश्वरचिन्तकः ।
जरामृत्युजगज्जन्म सुखदुःखाकुलं जगत् ।। ४७ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पश्यन्मा प्रमदो भूयाद्विश्वेशपदपूजने ।
आयुर्यात्येव नियतमामकुम्भे यथा पयः ।। ४८ ।।

सम्पदो विपदस्ता हि स्वर्गे धर्मे तु नश्वराः ।
शोकमोहसमाक्रान्ताः ससुरासुरमानवाः ।। ४९ ।।

धनं क्षयान्तं सर्वेषां प्रियाणां विप्रयोगिता ।
परीक्ष्य सर्वं दुःखान्तं विरज्येतेति हि श्रुतिः ।। ५० ।।

नायुरायाति हि गतं धर्माद्यर्थानुचिन्तया ।
स्वस्थो हृत्स्थं शिवं ध्यायेत्तेन दुःखैर्विमुच्यते ।। ५१ ।।

सूतः

कः सन्तरेत भवमेतमसारसारं
मूढात्मनां मृगदृशां परिचिन्तनं यत् ।
दुःखायतभ्रमवतां परिधावितं यत्
तृष्णाहरं भवति किं मृगतृष्णिकाम्भः ।। ५२ ।।

स्कन्दः (उवाच)

प्रकाश्यो नैवायं विधिरपि कदाचिद् द्विजपशौ
प्रदेयोऽयं शान्तेष्वसमभवभक्तेषु नियतम् ।
शिवं स्मृत्वा श्रुत्वावगतमिदमेवाद्य मधुरं
श्रृणु त्वं भक्त्यैव श्रुतिगतमिदं ज्ञानमधुना ।। ५३ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे स्कन्दजैगीषव्य संवादोनाम पञ्चमोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। षष्ठोऽध्यायः ।।

वक्ष्याम्यद्य मुनिश्रेष्ठ नागानां तपसः क्रियाम् ।
अपर्णापतिपादाब्जध्यानसक्ताः सुपर्णजाः ।। १ ।।

भयं त्यक्त्वा विजह्रुस्ते ह्याकल्पा अभवञ्छिवे ।
इममर्थं पुरा देवी कैलासे प्राह शङ्करम् ।। २ ।।

विस्मितातीव सा वीक्ष्य भीता पन्नगसत्तमान् ।

देव्युवाच

नागैरेतैर्महादेव देवदेव जगत्पते ।। ३ ।।

तवाङ्गसङ्गजनकं पुण्यदं[1] किमुपार्जितम् ।
किमेभिः शङ्गलिङ्गार्चा [2]भुजङ्गैः किं कृता शिवा ।।

तन्मे वद विशेषेण करुणाकर शङ्कर ।
इत्थं गौर्या हरः पृष्टस्तदुत्तरमुवाच ह ।। ५ ।।

श्रीमहादेव उवाच

श्रृणु देवि प्रवक्ष्यामि नागानां पूजनं मयि ।
आकल्पाह्यभवंस्तेऽद्य तेसर्पा[3] भाग्यगौरवैः ।। ६ ।।

मम प्रियतराः सर्वे कन्दर्पारातिपूजया ।
कद्रूः सुपर्णी च पुरा विवदेत् शिवे किल ।। ७ ।।

1. पुण्यं किं समुपार्जितम् ।। 2. भुजङ्गैर्विहिता शिवा ।।

3. भुजङ्गाः । ते शब्दस्याम्रेडनं मा स्त्विति कृत्वा भुजङ्गाः इति पदयोजना युक्ता इति भाति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अश्ववालान्ततः कृष्णांश्चकार कुटिलेन हि ।
आशीविषविषेणैव फणिता साऽन्यया किल ।। ८ ।।

व्रीडायुक्ता सपत्नी सा सुपर्णी दास्यभावतः ।
सा दुःखिता सुतं प्राह [1]स्वस्य दास्यविमोक्षणे ।। ९ ।।

अमृताहरणार्थाय गरुत्मन्तं तदा मुने ।
कद्रूकौटिल्यतः पुत्र तत्पुत्रैश्च विषोल्बणैः ।। १० ।।

फणितेन[2] मया पूर्वं देवगन्धर्ववालके ।
नित्यं श्वेता इति मया कृष्णा इति तया पुनः ।। ११ ।।

दास्यं तदावयोर्वाक्यात्सत्यभूतं भवत्विति ।
दृष्टा पुत्रैः कृता तस्याः वालानामसितक्रिया ।। १२ ।।

दास्यभावं समापन्ना सपत्न्याः पुत्र नाशय ।
अमृताहरणेनैव त्वया [3]तीर्णाण्डजेश्वर ।। १३ ।।

एतदर्थं हि पितरौ पुत्रं काङ्क्षयतः सुत ।
पुंनाम्नो नरकात् त्राता पुत्र एव न संशयः ।। १४ ।।

यदामृतं ते दास्यामि तदा दास्यं न चैव मे ।
इति प्रोक्तं मया तस्यै तत्पुत्र परिपालय ।। १५ ।।

1. निजदास्य विमोक्षणे ।
2. फणितेन वाला नित्यं श्वेता इति मया कृष्णा इति तया च फणितम् । मया यत्फणितं तेन सपत्नया यं दास्यभावं अप्पन्नाहं, तं विनाशय ।।
३. त्वत्कर्तृकामृताहरणकर्मणैव अहं दास्यभावदुत्तीर्णा भविष्यामि ।।

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यो दुःखात् त्रायते पुत्रः पितरौ स सुतोत्तमः ।
अस्मात् दुःखाम्बुसंरोधात्समुत्तारय मां द्रुतम् ।। १६ ।।

इति मातुर्वचः श्रुत्वा गरुडः पततां वरः ।
प्राह प्राणम्य तां देवीमेवमस्त्विति [1]दर्पितः ।। १७ ।।

गतः स काश्यपिस्तस्मान्मेरोः शिखरमुत्तमम् ।
नानाद्रुमलतोपेतं फलपुष्पावनामितम् ।। १८ ।।

मृगाण्डजवरैर्युक्तं स गत्वा पितुराश्रमम् ।
तपस्यन्तं तपोराशिं पितरं काश्यपं तदा ।। १९ ।।

भस्मरुद्राक्षसम्पन्नं शिवाराधनतत्परम् ।
शाम्भवैर्मुनिभिर्युक्तं रुद्रसूक्तजपादरम् ।। २० ।।

प्रणम्य विनयेनैव स्थितस्तस्यैव सन्निधौ ।
तेनानुमोदितस्तत्र निषसादाण्डजेश्वरः ।। २१ ।।

तं दृष्ट्वा संवसुतं विप्रो गरुडं खिन्नमानसम् ।
उवाच विनयोदारं कश्यपोऽब्जजसम्भवः ।। २२ ।।

कुतः समागतं वत्स क्व वासं प्रतिगच्छसि ।
किं चिकीर्षुरिह प्राप्तः परिक्लिष्टोऽभि दृश्यते ।। २३ ।।

तत्पितुर्वचनं श्रुत्वा प्राञ्जलिः प्राह तं मुनिम् ।
भगवंस्तपतां श्रेष्ठ साक्षादब्जजसम्भव ।। २४ ।।

1. दर्पत इति सङ्गतः पाठो भाति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

[1]मात्रोर्विवदतोरेवं दास्यभावेन खेदितः ।
मातुर्दास्यविमोक्षाय त्वत्सकाशमिहागतः ॥ २५ ॥

भवान् पिता शाम्भवश्च महात्मा शिवभावनः ।
अमृताहरणे यत्नं कर्तुमिच्छामि साम्प्रतम् ॥ २६ ॥

मातुरानृण्यमिच्छामि कृत्वा दास्यविमोचनम् ।
केन प्राप्तिर्भवेन्मह्यं तदुदाहर मां प्रति ॥ २७ ॥

तदद्य भगवानेव ब्रवीतु कृपया मयि ।
कं यायां शरणं लोके विहायैकं प्रजापतिम् ॥ २८ ॥

इत्यण्डजवचः श्रुत्वा काश्यपो ज्ञानचक्षुषा ।
समीक्ष्य पत्न्याः कौटिल्यं कनीयस्याः मुनीश्वरः ॥ २९ ॥

उवाच तपसांश्रेष्ठः शिपिविष्टपदाश्रयः ।
सापत्न्यं नाम लेकेषु पुत्र कौटिल्यदं सदा ॥ ३० ॥

सापत्न्याद्धि महद्दुःखं देवैर्दैत्यैः पुरा सुत ।
सङ्गरोऽङ्गारसदृशः प्राप्तः स्वर्गेऽण्डजाश्रय ॥ ३१ ॥

ध्रुवो दाशरथिश्चैव पाण्डवा दुःखभूमयः ।
सापत्न्येनैव कौटिल्यात्क्षत्रिया भ्रंशिताः पदात् ॥ ३२ ॥

नलोऽपि पुष्करेणैव विजितो नृपनन्दनः ।
पुनरभ्यर्च्य देवेशं स्वराज्यं लेभिरे नृपाः ॥ ३३ ॥

1. अम्बयोर्विवदमानयोः - दास्यभावेन खिन्नोऽहमम्बयोर्विवदमानयोः इति सङ्गच्छते ।

CC-0. SarTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

बाह्याश्च शत्रवस्त्वन्ये सपत्न्योह्यान्तराः स्मृताः ।
काद्रवेयैः कृतं कर्म मातुस्ते दास्यकारणम् ।। ३४ ।।

अमृताहरणार्थाय सुराणां विजयाय च ।
उपायं ते प्रवक्ष्यामि विजयाय रणे द्विज ।। ३५ ।।

अनर्चितमहेशनो जयं नैवाप्स्यति ध्रुवम् ।
समभ्यर्च्य महादेवं सुराश्च जितशत्रवः ।। ३६ ।।

तस्मादाराधयेशानं जेतारमपराजितम् ।
क्षयद्वीरं महादेवं शङ्करं शरणं व्रज ।। ३७ ।।

यदि देवः शरण्यश्च जयस्तस्य न दुर्लभः ।
पुरा विष्णुश्च देतेयपीडितामरचोदितः ।। ३८ ।।

जगाम शरणं साम्बं देवदेवं कपर्दिनम् ।
सहस्रं शरदां वत्स भस्मरुद्राक्षभृत्स्वयम् ।। ३९ ।।

पञ्चाक्षरजपासक्तः पञ्चास्यध्यानपूर्वकम् ।
समभ्यर्च्याम्बुजवरैर्नेत्रेणाभ्यर्च्य शूलिनम् ।। ४० ।।

शिपिविष्टात्स्वयं तुष्टाच्चक्रं लेभे सुदर्शनम् ।
तेनाजौ निहता दैत्याः कोटिशो बलवत्तराः ।। ४१ ।।

हिरण्याक्षश्च कशिपुः कालकंज्याः पुलस्त्यजाः ।
मधुकैटभसंज्ञाश्च मुरकंसादयः पुरा ।। ४२ ।।

कर्मदेवेषु स श्रैष्ठ्यमवाप ज्येष्ठपूजया ।
ब्रह्मणापि महादेवः पूजितो भक्तिभावतः ।। ४३ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अलभत्सृष्टिसामर्थ्यं वेदजालं महेश्वरात् ।
इन्द्रोऽपि वज्रं लेभे वै श्रीमहादेवपूजया ।। ४४ ।।

वृत्रासुरसमुद्धर्ता ब्रह्महत्यामवाप ह ।
दध्यौ सम्पूजयन् साम्बं तस्मात्पापाद्विमोचितः ।। ४५ ।।

गुरोर्भार्यापहरणात्स्वभार्याणां [1]विवर्जनात् ।
रोहिण्यामतिकामेन [2]जायेन्यं समपद्यत ।। ४६ ।।

चन्द्रो यक्ष्मविनिर्मुक्तः सूर्यः कुष्ठाद्विमोचितः ।
दक्षो विनिन्दनात्कुम्भो लिङ्गार्चातो विमोचितः ।। ४७ ।।

दधीचिर्मङ्कणो गार्ग्यः कण्वो मेधातिथिर्मुनिः ।
गौतमः कवषो धौम्य उपमन्युर्महाद्युतिः ।। ४८ ।।

क्षीरवारिधिमासाद्य मोदते शङ्करार्चकः ।
माकण्डेयो विजिग्येऽथ यमं सर्वभयप्रदम् ।। ४९ ।।

विश्वनाथार्चनेनैव सोऽब्धिपः कलशोद्भवः ।
दुर्वाससस्तपोवृद्धिरीशानुग्रहतो द्विज ।। ५० ।।

तथैवान्ये नृपतयः सोमसूर्यान्वयोद्भवाः ।
विमुक्तास्ते समभ्यर्च्य महादेवस्य पूजनम् ।। ५१ ।।

न विना शङ्करस्यार्चां भुक्तिमुक्ती हि सिध्यतः ।
स्वर्गं पुत्र्यं यशस्यं च महादेवस्य पूजनम् ।। ५२ ।।

1. रोहिणीतरभार्याणां विवर्जनात् ।
2. जायाघ्नः ।

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भक्त्या बिल्वैः समभ्यर्च्य मस्मरुद्राङ्गभूषणः ।
महापापैर्विमुच्येत किं पुनश्चोपपातकैः ।। ५३ ।।

भृगुरुज्जीवयामास स्वभार्यां निहतां पुरा ।
विष्णुर्हि छद्मना पूर्वं सुरकार्यर्थसिद्धये ।। ५४ ।।

शशाप विष्णुं विप्रोऽसौ सदा भर्गपदाश्रयः ।
मुनयो गणपाश्चैव अन्ये चैव सुरासुराः ।। ५५

लेभिरे वञ्छितान्येव तस्मात्त्वमपि पूजय ।
शिवस्य लिगं दयितं बिलवैः (बिल्व)भस्माक्ष भूषणः ।। ५६

विष्णुस्स्त्रीवधनिर्घृणो जनिजरानाशप्रदं शापक-
माग‍द्दैत्यवरैः सुराजिविजितैः सम्प्रार्थितोऽसौभृगुः ।
तेषु स्थानवरं दिदेश कृपया तद्विष्णुरालोक्य वै
चक्रीकृत्य तदीयभावभवतोन्यर्वाक् परावर्तत ।। ५७ ।।

तामुज्जीव्य भृगुः शशाप हरिमप्याजौ हि भर्गार्चको
योनिष्वप्यतिकुत्सितासु नितरां देवैस्तदा द्रुद्रुवे ।
दैत्यानाह गतव्यथाश्च निरुजाः प्रापद्यथाथो द्रुतं
पाताले निवसन्तु भोगिनिलये शम्भोः पदाब्जार्चकाः ।।

।। इति श्रीशिवरहस्ये अष्टमांशे षष्ठोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। सप्तमोऽध्यायः ।।

कश्यपः (उवाच)

अमृतं रक्षितं देवैर्नाकसद्मनि सर्वदा ।
उदायुधधरा देवास्तद्रक्षन्त्यनघं द्विजा ।। १ ।।

निद्रातन्द्रादिरहिताः शक्रस्याज्ञावशेन हि ।
तज्जयोपायमेतत्ते कथयाम्यण्डजेश्वर ।। २ ।।

त्रिपुरा वञ्चितास्तेन विष्णुना वञ्चितो बलिः ।
मोहयामास तन्त्रेण कुशास्त्रेण सुरास्तदा ।। ३ ।।

पाषण्डांस्तान् स्वयं चक्रे शिवभक्ताञ्जितेन्द्रियान् ।
शिवार्चनपरिभ्रष्टान् भस्मरुद्राक्षवर्जितान् ।। ४ ।।

पञ्चाक्षरोज्झितांश्चक्रे रुद्राध्यायविवर्जितान् ।
कृत्वैव योधयामास विजिग्ये तान् हरिः पुरा ।। ५ ।।

स्वयं गर्वेण तत्याज शिवचिह्नानि शूलिनः ।
वीरभद्रेण निहतो दक्षयज्ञे पुरा हरिः ।। ६ ।।

तृतीयांशे स कथितो विस्तारश्चाण्डजेश्वर ।
तेन पापेन स हरिर्निहतः शूलपाणिना ।। ७ ।।

मस्त्यकूर्मवराहादिनारसिह्मतनूष्वापि ।
यः शाम्भवाचारहीनान् पाषण्डान् कुरुते नरान् ।। ८ ।।

कुतर्कवाक्यैर्यो मर्त्यो विप्रो वा नरकं व्रजेत् ।
अधोमुखोर्ध्वपादोऽसौ लम्वतेऽहर्निशं बलैः ।। ९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सर्वेषां निष्कृतिः प्रोक्ता पापानां नरकापहा ।
शिवद्रोहः शम्भवानां द्रोहो वा नरकावहः ।। १० ।।

नरकोत्तारणं नृणां नैव जातु भविष्यति ।
शिवद्रोहेषु सर्वेषु शरण्यः शिव एव हि ।। ११ ।।

स मोचको महादेवः शिवद्रोहेषु सत्तम ।
सहमानतया सर्वं भक्तानां पापनाशकम् ।। १२ ।।

नान्येषां निष्कृतिः प्रोक्ता शिवद्रोहेषु सत्तम ।
तस्मात्तं शरणं याहि सर्वां सिद्धिं प्रयच्छति ।। १३ ।।

विद्यां हृद्यां ददाम्येव तव पञ्चाक्षरात्मिकाम् ।
पञ्चाक्षरपरोमर्त्यः शिवज्ञानाय कल्पते ।। १४ ।।

तेन मुक्तो भवत्येव विद्यया द्योततेऽण्डज ।
पितेवोपदिशेन्मन्त्रं गायत्र्याः सममेव हि ।। १५ ।।

गायन्तं त्रायते यस्मात् गायत्री भर्गचिह्निता ।
संसारभर्जको भर्गः शिव एवेति निश्चिनु ।। १६ ।।

पञ्चाक्षरं च गायत्री श्रौतमन्त्रद्वयं स्मृतम् ।
उभयोर्दैवतं यस्मात् महादेवो महेश्वरः ।। १७ ।।

विप्रैरेव सदा मन्त्रो जपनीयः प्रयत्नतः ।
स्त्रीशूद्राणां नमोऽन्तेन जपः पञ्चाक्षरः परः ।। १८ ।।

अभावे तु पितुः पुत्रस्तत्पिता पुत्र एव हि ।
यथैवोपनयेच्छास्त्रं तथा पञ्चाक्षरेऽपि च ।। १९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

गायत्रीवत्सदा जप्यो मन्त्रराजोऽयमुत्तमः ।
तस्मात्तवोपदेक्ष्यामि मन्त्रं पञ्चाक्षरं परम् ।। २० ।।

मन्त्रेणानेन देवेशं यः पूजयति शङ्करम् ।
सर्वपापविमुक्तश्च जायते नात्र संशयः ।। २१ ।।

पञ्चाक्षरं सतारं यः प्रजपेत्प्रीतिपूर्वकम् ।
स तु मुक्तो भवत्येव षडक्षरसमाश्रयात् ।। २२ ।।

पञ्चास्यध्याननिरतः पञ्चाक्षरजपादरः ।
महापापयुतो वापि युक्तो वाप्युपपातकैः ।। २३ ।।

विमुच्यते सद्य एव राहुमुक्त इवोडुराट् ।
न गायत्र्याः परो मन्त्रो न च पञ्चाक्षरान्मनुः ।। २४ ।।

द्विजत्वेनैव सा प्रोक्ता गायत्री भर्गदेवता ।
शिवप्रसादसिध्यर्थं श्रीमत्पञ्चाक्षरो मनुः ।। २५ ।।

द्विजानामुभयो मन्त्रः सर्वेषामेव काम्यकः ।
परस्त्रीभिश्च शूद्रैश्च नमोऽन्तेन महामनुः ।। २६ ।।

गायत्रीति द्विजातीनामेवं त्रैवर्णिकेष्वपि ।
नान्येषां शूद्रजातीनां अङ्गनानां जपः समृतः ।। २७ ।।

शूद्रो जप्त्वा तु गायत्रीं नरके पच्यते चिरम् ।
वेदमाता च गायत्री वेदमध्यगते स्वयम् ।। २८ ।।

तस्मान्मन्त्रद्वयं देवि सर्वथा श्रुतिमध्यगम् ।
प्रलये समनुप्राप्ते वेदा लीयन्ति यत्र वै ।। २९ ।।

CC-0. SaTrasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

गात्र्यामेव गायत्री भर्गशब्दे शिवात्मके ।
शिवः पञ्चाक्षराकारः पञ्चवर्णाः शिवस्य खे ।। ३० ।।

वर्णपञ्चाक्षरस्यास्य पञ्चास्यक्रमतः शिवे ।
लीयन्ते किल कल्पान्ते प्रणवो हृदये शिवे ।। ३१ ।।

तस्माच्छ्रुतिषु सर्वत्र शिवो गीतः सदाशिवों ।
ईशानः सर्वविद्यानामीश्वरः सर्वभूतकृत् ।। ३२ ।।

ब्रह्मैव सर्वदा शम्भुः ब्रह्मणोऽधिपतिः शिवः ।
नकारश्च लयं याति सद्योजातास्यके शिवे ।। ३३ ।।

मकारोऽपि लयं याति वामदेवास्यके शिवे ।
शिकारोऽपि हि लीयेत अघोरास्ये महेश्वरे ।। ३४ ।।

वकारोऽपि च लीयेत शिवे तत्पुरुषात्मके ।
यकारोऽपि च लीयेत सर्वाङ्गेऽपि च शङ्करे ।। ३५ ।।

एवमेव महामन्त्रमविमुक्ते विशेषतः ।
सतारस्तारको मन्त्रः शैवेभ्य उपदिश्यते ।। ३६ ।।

स न जीवेभ्य एवैश ईशानेन दयालुना ।
नातः परतरो मन्त्रस्तारकः पारमैश्वरः ।। ३७ ।।

यस्मादुच्चार्यमाणेन शिवरूपं विभासते ।
शिवस्वरूपभावेन स तु साक्षाच्छिवो भवेत् ।। ३८ ।।

वर्णेभ्योऽपि परं सारं तारं शिवमयं विदुः ।
अविद्याकर्मपाशेभ्यस्तारणात्तारमेव हि ।। ३९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वर्णास्त्वन्ये तु सगुणा निर्गुणं तारमेव हि ।
सतारं वर्णसहितं शिवरूपावभासकम् ।।
संशीलयन् परं याति शिवमेव हि निर्गुणम् ।। ४० ।।

गायत्रीमन्त्रसारं द्विजकुलतिलकाकार सिद्धत्वदायि
मन्त्रोऽयं शिवतोषकृत् सुविहितो वेदान्तभागेष्वपि ।
तारोऽयं परनिगुणप्रवटने शब्दादिरेवैष वै-
भिक्षूणामथ शाम्भवात्मकहृदा संशीलितो मुक्तिदः ।।

।। इति श्रीशिवरहस्ये अष्टमांशे सप्तमोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। अष्टमोऽध्यायः ।।

पतङ्गः

प्रदेहि परमं मन्त्रं संसारो नारकं गुरो ।
येन मुक्तो भवाम्यद्य संसारदघसागरात् ।। १ ।।

सिद्धं च साधये काम्यं प्रसादात्परमेष्ठिनः ।
मातुरानृण्यमिच्छामि प्रसादादेव शूलिनः ।। २ ।।

त्वत्तो मन्त्रमिमं लब्ध्वा [1]तव शम्भोः प्रसादकृत् ।
यः पुत्रः पितरं त्यक्त्वा शाम्भवं ज्ञानपारगम् ।। ३ ।।

पञ्चाक्षरं चान्यमुखाल्लब्ध्वा सम्पूजयेच्छिवम् ।
शनैर्वाधिक्कृतो भूयात्प्रसादात्परमेष्ठिनः[2] ।। ४ ।।

तत्वविद्भिश्च कथितं शिवोऽप्याहैवमेव हि ।
अशाम्भो यद्दयितो(तः) पुत्रश्चेच्छाम्भवो भवेत् ।। ५ ।।

शाम्भवादेव गृह्णीयात्तन्मन्त्रं वैदिकोत्तमात् ।
नाविद्वत्पितृतो मन्त्रमित्याह परमेश्वरः ।। ६ ।।

तस्माच्छिवोदितो मार्गो हेरम्बाय पुरा मुने ।
ददौ शिवायै च तथा स्कन्दाय प्रददौ शिवः ।। ७ ।।

गणानां प्रदौ मन्त्रं पञ्चाक्षरमनुत्तमम् ।
भर्तुः सकाशाद्भार्यापि लब्ध्वा मन्त्रं शिवं यजेत् ।। ८ ।।

1. देवः शम्भुः प्रसादकृत् इति पाठः युक्तो भाति ।
2. आज्ञया परमेष्ठिनः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नमोऽन्तेनैव शूद्रोऽपि यतः स्त्री सममुच्यते ।
शूद्राणां नैव मन्त्रेषु अधिकारो मुने किल ।। ९ ।।

पञ्चाक्षरे न वै शूद्रानधिकृत्य वदेद्गुरुः ।
तन्मे वद विशेषेण संशयेऽस्मिन् हि काश्यप ।। १० ।।

ततः पतगराजस्य श्रुत्वा वचनमीदृशम् ।
पद्मजातसुतः प्राह तदुद्बोधकरं वचः ।। ११ ।।

सत्यमुक्तं त्वया पुत्र गुह्याद्गुह्यतरं वचः ।
तदद्य सम्प्रवक्ष्यामि यथाशिवमनोरथम् ।। १२ ।।

विरक्तानां तु शूद्राणां शाम्भवाचारवर्त्मनाम् ।
गुरुत्वेन द्विजः शूद्रैः परिग्रह्यो न शूद्रजः ।। १३ ।।

विप्रोऽपि शाम्भवो युक्तं शूद्रं भस्माक्षधारणम् ।
परीक्ष्य नियतं धर्म्यं ग्राम्यं वा सङ्करं न च ।। १४ ।।

शिवालयतले गत्वा शिवतीर्थं निषेव्य च ।
सन्निधौ दक्षिणामूर्तेः भूर्जपत्रे लिखेन्मनुम् ।। १५ ।।

त्रिवारं वाचयेद्विप्रः शूद्राद्विधवयापि च ।
नमोऽन्तं विधवाशूद्रौ तथान्ये द्विजवत्स्मृताः ।। १६ ।।

न स्वयं तद्वदेत्कर्णे शूद्रास्य द्विजसत्तमः ।
स च शिष्यो भवेच्छूद्रो गुरुर्विप्रो न संशयः ।. १७ ।।

एवमाहुः पुराचार्याः शिवाभिमतमुत्तमम् ।
स्त्रियोऽपि भर्तृमुखतः प्राप्यमन्त्रमिमं जपेत् ।। १८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अन्ये वर्णास्त्रयोऽप्येवं पितुः प्राप्य महामनुम् ।
जपेयुः पूजयेयुश्च मन्त्रेणानेन शङ्करम् ।। १९ ।।

बिल्वपत्रैः प्रसूनैर्वा त्रिवारं सकृदेव वा ।
मृल्लिङ्गे रसलिङ्गे वा धातुजे नार्मदेऽपि वा ।। २० ।।

रत्नलिङ्गेषु वा सम्यक्स्थावरे वा चरेऽपि वा ।
स्वायम्भुवे वा दैवे वाप्यर्षे वा मानवैः कृते ।। २१ ।।

उत्तरोत्तरतोत्कर्षात्पूजनीयः सदाशिवः ।
लिङ्गेष्वेतेषु भक्त्यैव नियमाच्छङ्करार्चकः ।। २२ ।।

स्फाटिके पूजितः शम्भुः प्रददाति च वाञ्छितम् ।
लिङ्गार्चनेन सकलं वाञ्छितं प्राप्यते नृभिः ।। २३ ।।

सर्वे लिङ्गार्चनेनैव प्राप्यन्ते हि मनोरथाः ।
शिवस्य लिङ्गपूजैव मुक्तिदा श्रुतिदर्शिता ।। २४ ।।

आमनन्त्यण्डजश्रेष्ठ जाबालश्रुतयो ध्रुवम् ।
शिवलिङ्गमनभ्यर्च्य न पेयं जलमप्यणु ।। २५ ।।

फलं वा यद्यदा भोज्यमन्नं वा शङ्करार्पितम् ।
भुञ्जीयाच्छ्रीमहेशाय यन्निवेदितमुत्तमम् ।। २६ ।।

अनभ्यर्च्य महादेवं योऽश्नीयत्फलमम्बु वा ।
स पापी नरके घोरे तिष्ठत्याभूतसम्प्लवम् ।। २७ ।।

यद्यदह्नाच्चरेत्पापं यच्च तापत्रयात्मकम् ।
तदह्नात्प्रतिमुच्येत शिवलिङ्गार्चनेन हि ।। २८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रदोषे यः शिवं दृष्ट्वा परिपूज्य[1] स मुक्तिभाक् ।
द्वित्रैर्वा बिल्वपत्रैर्वा नीरैर्वापि महेश्वरम् ।। २९ ।।

सोमवारे तथा सायं शतजन्मघनाशनम् ।
कालाष्टम्यां कालकालं सायमभ्यर्च्य शङ्करम् ।। ३० ।।

भूतायां वै भूतनाथं सायमभ्यर्च्य शङ्करम् ।
नैवेद्यं निशि भुक्त्वैव सर्वथा गणपो भवेत् ।। ३१ ।।

संसाररोगनिर्मुक्तो मुक्तये कल्पते नरः ।
तथा पर्वस्वपि शिवं ग्रहणे सोमसूर्ययोः ।। ३२ ।।

समभ्यर्च्यामरश्रेष्ठं सर्वकालेष्वपि ध्रुवम् ।
यावज्जीवं समभ्यर्च्य जीवन्मुक्तो भवेन्नरः ।। ३३ ।।

प्रमादादेकदा त्यक्त्वा शिवलिङ्गार्चनं सुत ।
वापयित्वा शिरः केशान् प्राश्य गव्यादिपञ्चकम्[2] ।। ३४ ।।

रुद्रैर्होमं हुनेदेवं चरुणा सर्पिषा द्विजः ।
स्वसूत्रोक्तेन मार्गेण कृत्वा पूर्वापरक्रमम् ।। ३५ ।।

शाम्भवं भोजयित्वैकमुपोष्याभ्यर्च्य शूलिनम् ।
पूर्वाहापरहे[3] चैव कृत्वा पूजेदयं पुनः ।। ३६ ।।

भुञ्जीत शाम्भवैः सार्धं नैवेद्यं यच्छिवार्पितम् ।
तत्पापमुक्तो भवति इत्याह परमेश्वरः ।। ३७ ।।

1. प्रदोषे यः शिवं दृष्ट्वा पूजयेत्स विमुक्तिभाक् ।
2. पञ्चगव्यमित्यर्थेऽयं प्रयोगः ।
३. पूर्वह्णे चापराह्णे च कृत्वा सम्पूजयेत्पुनः इति वक्तव्ये तथा शब्दप्रयोग इति भाति ।

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शिवार्चनपरित्यागे महापापं प्रकीर्तितम् ।
निष्कृतिर्विहिता शास्त्रे महापापे क्वचिद् द्विज ।। ३८ ।।

प्राणान्तं न ततो घोरं नरकं प्राप्नुयान्नरः ।
गृहीत्वा नियमं विप्रो शिवलिङ्गार्चनाक्रमे ।। ३९ ।।

वरं प्राणपरित्यागश्छेदनं शिरसो द्विज ।
अनभ्यर्च्य महादेवमन्नं नाश्नीत कश्चन ।। ४० ।।

एवं नियममास्थाय त्यक्त्वैतच्छङ्करार्चनम् ।
त्यक्तप्राणो न शुध्येत मृतो नरकमृच्छति ।। ४१ ।।

तस्मादतन्द्रितो लिङ्गे पूजनीयः सदाशिवः ।
शिवप्रसादजनकं शिवलिङ्गस्य पूजनम् ।। ४२ ।।

भुक्तिदं मुक्तिदं चापि ज्ञानदं सर्वदा नृणाम् ।
अवश्यं तद् द्विजातीनामित्याह शशिशेखरः ।। ४३ ।।

नान्यदेवैः समं शम्भुं पूजयेद्विश्वनायकम् ।
पशवो ब्रह्मविष्ण्वाद्यास्तैः समं पतिपूजनम् ।। ४४ ।।

न कार्यं सर्वथा सर्वैर्नप्रसादकरं हि तत् ।
मा त्वा रुद्रेति मन्त्रेण श्रुतिः पूजां निषेधति ।। ४५ ।।

सहाह्वानार्चनं शम्भोर्नैव कुर्यात्सुरान्तरैः ।
नरकावहमेवाद्य नात्र कार्या विचारणा ।। ४६ ।।

विश्वाकाराः सर्व एव स तु विश्वाधिकः शिवः ।
एकः शिवस्तथाद्वैतो द्वैतवार्तापि तत्र न ।। ४७ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तस्मात्सम्पूजयेत्साम्बं लिङ्मेव पिनाकिनः ।
शिवलिङ्गार्चनेनैव शिवस्तुष्यति नान्यथा ।। ४८ ।।

अन्येऽपि बहवो धर्माः शिवप्रोक्ताः प्रसादतः ।
साक्षात्प्रसादजनकं शिवलिङ्कार्चनं द्विज ।। ४९ ।।

लिङ्गेऽर्चितो महादेवो दारिद्र्याद्यैर्विशेषतः ।
भक्तानां सकलाभीष्टं प्रददाति महेश्वरः ।। ५० ।।

अन्येऽपि शैवधर्मा ये बह्वायासार्थनाशकाः ।
करोतु वा यथाजोषं नैतत्त्याज्यं कदापि हि ।। ५१ ।।

इत्येव समयं कृत्वा वरमाप्राणसङ्क्षयम् ।
पूजनीयः शिवो लिङ्गे ज्ञानमुक्त्यभिकाङ्क्षिभिः ।। ५२ ।।

यः पूजयेच्छशिकलाविलसत्सुमौलि-
लिङ्गं महाशपथपूर्वकमेव विप्रैः ।
प्राश्यं जलं न च फलं न च भोज्यमन्नं
लिङ्गार्चनोज्झितिरहो नरकाय लोकः ।। ५३ ।।

स्कन्द उवाच

गरुडस्य वचः श्रुत्वा काश्यपः प्राह तं मुनिः ।
विनतातनयं दृष्ट्वा विनतं नियतो मुनिः ।। ५४ ।।

कः सन्तेरदुभयमेतदसारसारं
शम्भोः पदाम्बुजसमर्चनतो विहीनः ।
त्यक्त्वा सुरान्तरमनुत्तम चन्द्रमौलि-
लिङ्गार्चनेन सकलां श्रियमश्नुते च ।। ५५ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे अष्टमोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। नवमोऽध्यायः ।।

गरुड उवाच

किं वा प्रसादजनकं महादेवस्य वै मुने ।
तच्चरिष्यामि भक्त्यैव तद्वद त्वं गुरो मयि ।। १ ।।

काश्यपः (उवाच)

भस्माभ्यक्ततनुर्नित्यं पूजयेदिन्दुशेखरम् ।
भस्मधारणहीनानां प्रसादो नैव शाम्भवः ।। २ ।।

भवेज्जन्मशतेष्वेव द्विजस्यापि विशेषतः ।
भस्मधारणहीनानां ज्ञानं नैवोपजायते ।। ३ ।।

ज्ञानाङ्गत्वदिदं भस्म सृष्टमीशेन मुक्तिदम् ।
भस्मभस्मेति यो ब्रूयात्स तु पापैः प्रमुच्यते ।। ४ ।।

भस्मना पादपर्यन्तं यः स्नाति नियतं सदा ।
स तु सन्तरते घोरं संसारं दुःखदं नरः ।। ५ ।।

द्विजो वणिग्गृहस्थो वा यतिर्वापि वनाश्रमी ।
त्रिकालं भस्मनिरतो देवदेवप्रसादभाक् ।। ६ ।।

भस्मस्नान विहीनात्मा कृत्वा कर्माण्यपि द्विजः ।
नैव तत्फलमाप्नोति कुर्वन्यत्किञ्चिदप्यसौ ।। ७ ।।

प्रत्यवैति द्विजो वापि भवत्येव न संशयः ।
भस्मप्रभावो वेदान्तैः सर्वदा प्रतिपाद्यते ।। ८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अथर्वशिरसि स्वैरं भस्म प्रोक्तं हि पावनम् ।
शिरोद्गतमिदं भस्मस्नानमापादमस्तकम् ।। ९ ।।

अग्निरित्यादिभिर्मन्त्रैः स्नात्वा पापैः प्रमुच्यते ।
यो वा कोवाऽन्त्यजो वापि नित्यं भस्मतनुर्भवेत् ।। १० ।।

स महेशप्रसादस्य पात्रं भवति निश्चितम् ।
द्विजो वाप्युत्तमाचारो भस्मस्नानविवर्जितः ।। ११ ।।

यो भस्मधारिणं दृष्ट्वा नाभिनन्दति दुर्मतिः ।
तस्योत्पत्तौ च साङ्कर्यमनुमेयं विपश्चिता ।। १२ ।।

यतिर्वेदान्तनिष्ठोऽपि नैव तद्ज्ञानमाप्नुयात् ।
पठन् वा पाठयन्वापि नैव तद्ज्ञानमाप्नुयात् ।। १३ ।।

जीवात्मैक्यं परं ज्ञानं भस्मस्नानेन जायते ।
भस्माभ्यक्ततनुर्नित्यं त्रिपुण्ड्रपरिचिह्नितः ।। १४ ।।

स तपस्वी स दानार्हः सर्वकर्मार्हको भवेत् ।
त्रिणेत्रदयया पात्रं पवित्रो भवति ध्रुवम् ।। १५ ।।

मित्रभूतः सुराणां च भवत्येव न संशयः ।
भस्मधारणहीनो यः शिवलिङ्गं समर्चयेत् ।। १६ ।।

न तस्य पूजां गृह्णाति महादेवः पराङ्मुखः ।
भविष्यति न सन्देहः प्रत्युत प्रत्यवैति च ।। १७ ।।

सर्वदा सर्वकालेषु भस्मधृक्पावनः शुचिः ।
यः स्नाति स्नानदशकैर्विद्या बुद्ध्यापि मानवः ।। १८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भस्मस्नानादिनिर्मुक्त सोऽशुचिः सर्वकर्मणि ।
पवित्रं परमेतद्वै भस्मैव श्रुतिचोदितम् ।। १९ ।।

श्रौतानलोद्भवं भस्म महापापनिवर्तकम् ।
मुक्तिदं ज्ञानदं पुंसामग्निरित्यादिमन्त्रितम् ।। २० ।।

भस्मधृत्वैव सन्ध्यायामधिकारी न संशयः ।
अधृत्वा यदि तद्भस्म सन्ध्यां कुर्याद् द्विजाधमः ।। २१ ।।

भस्मधृत्वा पुनः सन्ध्यामाचरेत्सन्ध्ययोर्द्वयोः ।
श्राद्धं यज्ञस्तथा होमो विवाहोपनयादिकम् ।। २२ ।।

देवताभ्यर्चनं नित्यं काम्यं स्वध्यायतर्पणम् ।
सर्वं भस्मधृगेवाशु सर्वेषां फलमश्नुते ।। २३ ।।

स तपस्वी सदा पात्रं सर्वान्त्सन्तारयेन्नरान् ।
भस्मधारणमन्त्रेण दुःखं तरति मानवः ।। २४ ।।

अशुचिर्भिन्नमर्यादो भस्मधृक्पावनो भवेत् ।
अभक्ष्यभक्षणं कृत्वा गत्वाऽगम्यामपि द्विजः ।। २५ ।।

भस्मनः स्नानमात्रेण सर्वपापैः प्रमुच्यते ।
वराहं मूषकं बालमुन्मत्तं श्वानरासभम् ।। २६ ।।

स्पृष्ट्वा दृष्ट्वा द्विजो नित्यं भस्मस्नानं समाचरेत् ।
उदङ्कीं सूतिकां दृष्ट्वा यस्तपस्यति भस्मना ।। २७ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भस्मस्नानेन पापानां राशिर्वैभस्मसाद्भवेत् ।
भस्मधृक्सर्वदा पूज्यो यथा(यतः) शिवमयो हि सः ।। २८

सन्ध्ययोरथ मध्याह्ने निशीथे भस्मधृग्भवेत् ।
साचारोऽपि दुराचारो भस्मधृक्पावनो भवेत् ।। २९ ।।

भस्मत्रिपुण्ड्रसहितो नित्यमर्चति शङ्करम् ।
तेन दत्तं जलं पत्रं साक्षाद्गृह्णाति शङ्करः ।। ३० ।।

हव्यं गृह्णन्ति च सुराः कव्यं पितृगणाः स्मृताः ।
भस्मधारणमात्रेण शम्भुस्तस्मै प्रसीदति ।। ३१ ।।

प्रसादः[1] शङ्करो यस्मिन्मुक्तिस्तस्य करे स्थिता ।
दानं यद्दीयते दात्रा यो गृह्णात्यपि वै द्विजः ।। ३२ ।।

भस्मधारणमात्रेण उभयोर्वर्धते फलम् ।
[2]प्रातः स त्यज्यते विप्रो भस्मनाऽऽपादमस्तकम् ।। ३३ ।।

त्रिपुण्ड्रधृक्समस्तैश्च चरितैर्निशि पातकैः ।
त्रियायुषं त्रिपुण्ड्राङ्कः रात्रिपापं व्यपोहति ।। ३४ ।।

1. प्रसन्नः ।
2. यो विप्रो भस्मना आपादमस्तकं त्रिपुण्ड्रं धारयति स निशि कृतैः समस्तैः पातकैश्च प्रातः विमुक्तो भवति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मध्याह्नेऽपि तथा प्रातः[1] पातकैः प्रविमुच्यते ।
सायङ्काले भस्मधारी [2]अपराह्णादघात्सदा ।। ३५ ।।

मुक्तो भवति गौरीशप्रियकृत्स भविष्यति ।। ३६ ।।

भस्माभ्यक्ततनुर्भवेदथ महारुद्राक्षमालाधरो
रुद्राध्यायजपादरः शिवमहापञ्चाक्षरे सादरः ।
श्रीमत् त्र्यम्बकपादपङ्कजवरे ध्यायन्विमुक्तो भवे-
त्पापौघाद्भवसागराद्धर महादेवाश्रयाद्भावतः ।। ३७ ।।

लिङ्गं शान्तमपारबिल्वजदलै रक्ताम्बुजैरर्चयन्
दुर्भक्षप्रभवं महच्च दुरितं तूलानलोवै भवेत् ।। ३८ ।।

विघ्नाद्रिं त्वथ नाशयेज्जनिजरा रोगप्राणशो भवेत् ।। ३९

।। इति श्रीशिवरहस्ये अष्टमांशे नवमोऽध्यायः ।।

1. प्रातः कृतैः पापैः विमुच्यते । प्रातरारभ्य आमध्याह्नं कृतैः पापैः प्रविमुच्यते ।

2. अपराह्णादारभ्य कृतादघात् मुच्यते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। दशमोऽध्यायः ।।

काश्यप उवाच

भस्मनः पञ्चनामानि श्रुतिगीतानि वै द्विज ।
विभूतिर्भसितं भस्म क्षारं रक्षेति च क्रमात् ।। १ ।।

भासकज्ञानदानेन भस्मैतत्कीर्तितं सदा ।
ऐश्वर्यदानात्सा भूतिर्भसितं पापनाशनात् ।। २ ।।

क्षारं रक्षा च वै पापक्षरणाद्रक्षणात्तथा ।
जाबालैर्नितरामुक्तं भस्म पापभयापहम् ।। ३ ।।

भस्म मुक्तिप्रदत्वाच्च प्रसादकरणं महत् ।
यो भस्मरहितो विप्रः स एव श्वपचोऽन्त्यजः ।। ४ ।।

स नित्यसूतकी भूयाद्भस्मधारणवर्जितः ।
तेनाधीतं तथैवेष्टं जप्तं सर्वं च निष्फलम् ।। ५ ।।

आमनन्ति सदा भस्म श्वेताश्वतर शाखिनः ।
आमनन्ति सदा भस्म अथर्वशिरसि स्थिताः ।। ६ ।।

आमनन्ति सदा भस्म बृहज्जाबालशाखिनः ।
श्रुतयो भस्ममाहात्म्यं वदन्ति बहुधा द्विज ।। ७ ।।

मुनयो ब्रह्मविष्ण्वाद्या भस्ममाहात्म्यवेदिनः ।
देवैः सदैव सुधृतं भस्मेदं पावनं परम् ।। ८ ।।

ब्रह्मणा विष्णुनेन्द्रेण धृतं रुद्रैः सदैव हि ।
देवस्त्रीभिर्धृतं भस्म सर्वदा तत् त्रिपुण्ड्रवत् ।। ९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

देव्या च गणपेनैव स्कन्देन च धृतं परम् ।
स्त्रीभिर्धार्यमिदं भस्म मङ्गलं तद्भ्रुवोऽन्तरा ।। १० ।।

सभर्तृकाभिः सततं शिवाराधनसाधनम् ।
ज्ञानाङ्गत्वेन कथितं सर्वदा पावनं परम् ।। ११ ।।

श्रौतं त्रिपुण्ड्रमेवेदं त्यक्त्वैतन्नरकं व्रजेत् ।
ऊर्ध्वपुण्ड्रं मृदा कुर्वन् द्विजोऽपि श्वपचाधमः ।। १२ ।।

ऊर्ध्वपुण्ड्रं भ्रमेणापि नैव कुर्यात् द्विजः सदा ।
अश्रौतमूर्ध्वपुण्ड्रं स्यान्नधार्यं सर्वदा द्विजैः ।। १३ ।।

ऊर्ध्वपुण्ड्रेण यः कुर्याच्छिवलिङ्गस्य पूजनम् ।
स पापभाग्भवत्येव नात्र सन्देहकारणम् ।। १४ ।।

शिवप्रसादजनकं भस्मधारणमुत्तमम् ।
शिवप्रसादजनकं त्रिपुण्ड्रपरिधारणम् ।। १५ ।।

शिरोललाटवक्षस्सुदोर्द्वये यस्त्रिपुण्ड्रधृक् ।
स एव प्रियकृच्छ्रेष्ठो महेशस्य गणेश्वरः ।। १६ ।।

यो भस्मधारणं त्यक्त्वा मृदोर्ध्वपुण्ड्रधृङ्नरः ।
स नरो दुर्भगो विप्रः स एव श्वपचाधमः ।। १७ ।।

भस्मना पूतफालो यः स तपस्वी स तु द्विजः ।
स एव प्रेमसदनं मदनान्तकरस्य च ।। १८ ।।

भस्मधृक् पूयते पापैर्महद्भिरपि कृत्स्नशः ।
भस्मफालं त्रिपुण्ड्राङ्कं दृष्ट्वा भीतो यमः सदा ।। १९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नृगणाश्च पिशाचाश्च ग्रहाश्चैव विनायकाः ।
तं नरं नोपसर्पन्ति सर्वदा भस्मधारिणम् ।। २० ।।

भस्मधारणमात्रेण सदा शाम्यन्ति वे ग्रहाः ।
पञ्चाक्षरेण यो भस्म अभिमन्त्र्यैव धारयेत् ।। २१ ।।

आर्द्रैः शुष्कैस्तथा पापैर्मुच्यते नात्र संशयः ।
भस्मैव परमं तूर्यं पावनं ज्ञानभासकम् ।। २२ ।।

यो विनिन्दति भस्मेदं स निन्द्यां योनिमाप्नुयात् ।
भस्मयुक्तं त्रिपुण्ड्राङ्कं भोजयित्वा तु शाम्भवम् ।। २३ ।।

स भोजयति गौरीशं तेन तुष्टो महेश्वरः ।
पवित्राणां पवित्रं हि भस्मैव द्विजपुङ्गव ।। २४ ।।

न भस्मात् (भस्मनः) पावनतरं त्रिषु लोकेषु विद्यते ।
न भूत्या(यै) प्रमदेतैव इति श्रुत्यनुशासनम् ।। २५ ।।

भस्मना पूजयेल्लिङ्गं त्र्यम्बकेण स मुच्यते ।
सर्वेभ्योह्यपि पापेभ्यः स मुक्तो मोचयन्पुरा ।। २६ ।।

स जीवन् शिवतामेति साक्षाद्रुद्रसमो भवेत् ।
नित्याशुचिरयं देहो भस्मना शुचि(शैच)भाक् भवेत् ।। २७

भस्मैतच्च विहायैवमन्यपुण्ड्रधरो यदि ।
मुक्तिं विन्देत चेत्तस्मात्सागरः संप्लविष्यति ।। २८ ।।

CC-0. SaraTsvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विषपानेन नित्यत्वं यदि विन्देत मानवः ।
भस्मस्नानवीहीनोयः स भवेन्मायया वृतः ।। २९ ।।

यो भस्मस्नानयुक्तो भवति सुरनरो स द्विजो वाऽधमो वा ।
नैवान्यद्भगवत्प्रमोदजनकं ज्ञानं महत्प्राप्नुयात् ।। ३० ।।

धृत्वोर्ध्वं फलके ललाटतटके पाप्मा मृदा.....
निर्दग्धाखिलवंशसङ्करमहापापौघदुःखौघयुक् ।
यो भस्माभ्यक्तदेहो भवति जनिजरानाशपापाद्विहीनः
पापै[1]स्तापजदुःखभागनिकरं ज्ञानं महद्विन्दति ।। ३१ ।।

भुक्त्वा सौख्यमतीव शङ्करगणश्रेष्ठः सुरम्याकृति-
र्भूयादेव महाप्रभावसहितो विप्रऽथ मुक्तो भवेत् ।। ३२ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे दशमोऽध्यायः ।।

1. हित्वा

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। एकादशोऽध्यायः ।।

काश्यप उवाच

रुद्राक्षधारणं पुण्यं शिवप्रीतिकरं सदा ।
प्रसादजनकं साक्षात् शम्भोर्नित्यं पिनाकिनः ।। १ ।।

रुद्रनेत्रसमुद्भूता रुद्राक्षतरवोऽभवन् ।
बिन्दवस्त्रैपुरे युद्धे मीलिताक्षेण शम्भुना ।। २ ।।

पतिता भूतले वत्स ते भूमौ तरवोऽभवन् ।
द्वात्रिंशदक्षजातीयाः सकण्टाः सुषिरावृताः ।। ३ ।।

ब्राह्मणाः क्षत्रिया वैश्याः शुद्राक्षा इति विश्रुताः ।
ब्राह्मणाः श्वेतजातीया क्षत्रिया रक्तवर्णकाः ।। ४ ।।

वैश्याः पीतास्तु विज्ञेया शूद्राः कृष्णाः प्रकीर्तिताः ।
तत्तद्वर्णक्रमेणैव धार्या वर्णैरनुक्रमात् ।। ५ ।।

ब्राह्मणो बिभृयान्मूर्ध्नि सर्वाङ्गेषु विशेषतः ।
क्षत्रियोऽपि च वक्षस्सु बाह्वोरपि विशेषतः ।। ६ ।।

वैश्यः कण्ठे वक्षसि च शूद्रो मूर्धनि धारयेत् ।
ब्राह्मणोऽपि च सर्वाङ्गे धारयेत् त्र्यम्बकेन तु ।। ७ ।।

अघोरेणैव मन्त्रेण क्षत्रियो धारयेच्छुभान् ।
वामदेवेति मन्त्रेण वैश्यैर्धार्याः सदाक्षकाः ।। ८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शूद्रः शिवेति नाम्नैव धृत्वा मुक्तो भविष्यति ।
यतिस्तु प्रणवेनैव स्त्रीणां पञ्चाक्षरेण तु ।। ९ ।।

सभर्तृका कण्ठदेशे धृत्वैकं चाक्षमुत्तमम् ।
पाकादिकरणे योग्या रजसापि परिप्लुता ।। १० ।।

रत्नैः स्वर्णैश्च धार्यास्ते राजतेनाथवा सदा ।
सूत्रेण क्षौमजेनापि सर्वैर्धाया यथारुचि ।। ११ ।।

अशुचिर्वा शुचिर्वापि सर्वावस्थां गतोऽपि वा ।
रुद्राक्षमालाभरणः पवित्रो नात्रसंशयः ।। १२ ।।

त्रिणेत्रप्रियपात्रं स इति शास्त्रविदां मतम् ।
एकाननः शिवः साक्षात्तं धृत्वा शिवसाद्भवेत् ।। १३ ।।

द्विमुखं पार्वती शुम्भुस्तं धृत्वा पापमोचितः ।
त्रिमुखं वह्निरूपात्मा तं धृत्वाऽभक्ष्य[1] पापभुक् ।। १४ ।।

चतुर्वक्त्रस्स्वयं ब्रह्मा तं धृत्वा ब्रह्मलोकगः ।
पञ्चवक्त्रः स्वयं शम्भुस्तं धृत्वा पञ्चपातकैः ।। १५ ।।

विमुच्यते क्षणेनैव साक्षात् त्र्यक्षप्रसादभाक् ।
षड्वक्त्रं स्कन्ददैवत्यं धृत्वा स्कन्दसलोकगः ।। १६ ।।

सप्तानन्नं स्वयं देवी तं धृत्वा वह्निलोकगः ।
अष्टाननं तु रुद्राक्षं अष्टमूर्तेः प्रियं सदा ।। १७ ।।

1. तं त्रिमुखं धृत्वा अभक्ष्यभुक् पापभुक् च पूयते ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तद्धारणादष्टवसुलोकेऽसौ मोदते चिरम् ।
नवाननं स्वयं भीमो भीमपापैः प्रमुच्यते ।। १८ ।।

दशास्यं च सदा धृत्वा न यामीं याति यातनाम् ।
एकादशाननं रौद्रं तल्लोके निवसेच्च धृक् ।। १९ ।।

द्वादशास्यं सोमधाम प्रदोषाघविनाशनम् ।
त्रयोदशास्यं पापघ्नं धृत्वा विष्णुपदप्रदम् ।। २० ।।

चतुर्दशास्यं रुद्राक्षं शिवज्ञानप्रदं शुभम् ।
एवं चतुर्दशमुखं रुद्राक्षं धारयेत्क्रमात् ।। २१ ।।

सर्वपापैर्विनिर्मुक्तः पश्चान्मुक्तो भविष्यति ।
द्विजो वा श्वपचो वापि यो रुद्राक्षाणि धारयेत् ।। २२ ।।

स तरस्वी स मूर्धन्यो वदान्यो मुक्त एव हि ।
सदा शिवप्रसादस्य पात्रं नात्र विचारणा ।। २३ ।।

मुखं मुखेन संयोज्य धार्या रुद्राक्षमालिका ।
नो चेत्स्वतपसो हानिर्भविष्यति शिवाज्ञया ।। २४ ।।

द्वात्रिंशत्कण्ठस्थाने तु षट् षट् कर्णयुगे तथा ।
बाह्वोः षोडश धार्याणि मणिबन्धे तु द्वादश ।। २५ ।।

वक्षस्यष्टाधिकशतं भ्रुवोश्चैकं शिखास्वपि ।
द्विचत्वारिंशतिर्मूर्ध्नि सङ्ग्रहोऽयं प्रकीर्तितः ।। २६ ।।

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सहस्त्रं बिभृयान्नित्यं माला वा यावती भवेत् ।
कञ्चुकं वा यथा जोषं मकुटं मूर्ध्नि धारयेत् ।। २७ ।।

सहस्त्रमधमं प्रोक्तमिन्द्रलोकप्रदायकम् ।
दशसाहस्त्रधृङ्मर्त्यः सोमलोकमवाप्नुयात् ।। २८ ।।

अयुतं सूर्यलोकस्य लक्षं तु ब्रह्मलोकगः ।
कोटिं बिभर्ति यो दक्षः स च विष्णुमयो भवेत् ।। २९ ।।

अनन्ताक्षधरो यस्तु शिव एव भविष्यति ।
रुद्राक्षमालया जप्तो मन्त्रोऽनन्तफलप्रदः ।। ३० ।।

रुद्राक्षधारणे लज्जा येषामस्ति स्वभावतः ।
ते सर्वे दुर्भगा ज्ञेया अब्रह्मण्याः सदैव हि ।। ३१ ।।

रुद्राक्षेति वदन्मर्त्यो दशगोदानजं फलम् ।
प्राप्नोति शिवसारूप्यं तेन देहेन मुच्यते ।। ३२ ।।

मृण्मयेनापि रुद्राक्षं कृत्वा यत्नेन धारयेत् ।
रुद्राक्षधारणाद्रुद्रो भवत्येव न संशयः ।। ३३ ।।

तेषामेवात्मविज्ञाने[1] ये वै रुद्राक्षधारिणः ।
भिक्षवोऽपि च रुद्राक्षान् धृत्वा मुक्ता भवन्ति हि ।। ३४ ।।

रुद्राक्षमालाभरणः शिवलिङ्गं प्रपूजयेत् ।
तत्कृतामेव तां पूजां गृह्णाति परमेश्वरः ।। ३५ ।।

1. अधिकारसम्पत्तिरिति योजना ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अरुद्राक्षकृतां पूजां न गृह्णाति महेश्वरः ।
यो भस्मधारी नियतं स रुद्राक्षधरो भवेत् ।। ३६ ।।

नान्य[1]पुण्ड्रधरस्यापि न रुद्राक्षाणि धारयेत् ।
पुण्ड्रान्तरं यो धृत्वैव रुद्राक्षमपि धारयेत् ।। ३७ ।।

प्रत्युक्तो नारकी भूयादिति जाबालिकी श्रुतिः ।। ३८ ।।

यो[2] रुद्राक्षोसहरोसीतभसितमहापुण्ड्रेमस्तोरुबाहु
सम्पूज्य प्रमथाधिनाथमजरं(:)भक्तोऽथ मुक्तिं लभेत् ।
भूयाच्छङ्करकिङ्करोऽपि सुमहारुद्राक्षभस्माङ्गको
मारारातिपदाम्बुजार्चनरतः किं किं न विन्देत्स हि ।। ३९ ।।

यो रूद्राक्षोरुवाक्षाः सितभसितलसत्फालबाह्वक्षिमूलो
लीलाशीलाहि कालज्वलदनलकुलव्यालमालात्तशूलम् ।
ध्यायन्बुद्ध्याऽनिशं ध्यायति गतिदहृदा धन्यमान्योरुमन्युं
लोकाध्यक्षानुशिक्षाक्षपितकलुषधीर्मुक्तये शाम्भवो यः ।।

।। इति श्रीशिवरहस्ये अष्टमांशे रुद्राक्षमहिमा नामैकादशोऽध्यायः ।।

1. नान्यपुण्ड्रधरो यस्तु न रुद्राक्षाणि धारयेत् इति भावेन तथोक्तमिति भाति।
2. असङ्गतोऽय पाठ इति कृत्वा योजनार्हतया लिख्यते -
"यो रुद्राक्षसहस्रधृक्सुभसितभ्राजत् त्रिपुण्ड्रोऽन्वहं" इति ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। द्वादशोऽध्यायः ।।

मुनिरुवाच

श्रीरुद्रमन्त्रान्प्रजपन्नियतं भस्मधार्यपि ।
रुद्रमन्त्रान् जपन्विप्रो धयायेद्देवमुमापतिम् ।। १ ।।

वेदानां मध्यगं(:)साक्षाद्यजुषां मध्यगं(:) परम् (:) ।
शतशाखातं(स्)त्वेतद्रुद्रमन्त्रः शिवप्रियः ।। २ ।।

रुद्रप्रियकरं(:) साक्षाद्रुद्रमन्त्रं(:) श्रुतिःश्रुतम् ।
रुद्राध्यायार्थविज्ञानी पदार्थज्ञानवान्नरः ।। ३ ।।

नमोऽन्तेन शिवं ध्यायन्सर्वपापैः प्रमुच्यते ।
नमोऽन्तेन च तद्रूपधारी शिवाय एव हि ।। ४ ।।

ध्यायन्महेशं तद्रूपं पतीनां परमेश्वरम्[1] ।
सर्वेषामप्युमाकान्तं नितान्तं शान्तमव्ययम् ।। ५ ।।

रुद्राध्यायगतैर्मन्त्रैर्नमोऽन्तैरुभयैरपि ।
एकद्वित्रिनमस्कारैर्ध्यायेद्देवं पिनाकिनम् ।। ६ ।।

सर्वदेवाधिदेवेशं विश्वेशं रुद्रसूक्ततः ।
ध्यायन्मन्त्राञ्जपेद्रुद्रांस्तत्तदर्थावबोधतः ।। ७ ।।

श्रीरुद्रमन्त्रं प्रजपेद्भस्मधारणपूर्वकम् ।
भस्मधार्यधिकारी च तथा रुद्राक्षधार्यपि ।। ८ ।।

1. पतिमीश्वरम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रुद्राध्यायजपे योग्यास्त एव भुवने द्विजाः ।
नान्यपुण्ड्रधराः सर्वे नाधिकारिण एव हि[1] ।। ९ ।।

प्रत्युतो रुद्रमन्त्रांश्च प्रजपन् पापभाग्भवेत्[2] ।
यस्तु रुद्राञ्जपेन्नित्यं ध्यायमानो महेश्वरम् ।। १० ।।

सर्वपापविशुद्धात्मा शिवत्वमुपगच्छति ।। ११ ।।

स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा
मद्यं पीत्वा गुरुदारांश्च गत्वा ।
भस्मछन्नो भस्मशय्यां शयानो
रुद्रध्यायी मुच्यते सर्वपापैः ।। १२ ।।

एकवारं जपन् रुद्रं पापैर्मुक्तो भविष्यति ।
द्विवारं च प्रजप्यैव रुद्रं ध्यायन्महेश्वरम् ।। १३ ।।

गाणपत्यमवाप्नोति शिवस्य परमात्मनः ।
तृतीयवारं प्रजपञ्छिवे संलीयते सदा ।। १४ ।।

एकादशानुवारं यो रुद्रमन्त्रं जपेद्बुधः (द्विजः) ।
शं च मे इत्यादि च जपन् क्रमादेकादशावृतम् ।। १५ ।।

जपाल्लिङ्गेऽभिषेको[3] वै शम्भोः प्रियतमो मतः ।
वस्त्रपूतेन तोयेन अविच्छिन्नां प्रकल्पयेत् ।। १६ ।।

1. अन्य पुण्ड्रधरा) सर्वे अधिकारिणः न, नैव भवन्ति इति नञ् द्वयस्य विनियोगः ।
2. प्रत्युत प्रजपन्रुद्रमन्त्रांश्च पापभाग्भवेदिति च युक्तः पाठः ।
3. लिङ्गेऽभिषेकाच्च इति पाठोऽपि साधुत्वमर्हति ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

धारां प्रीत्या प्रकल्पेत शिवलिङ्गे द्विजोत्तमः ।
जपाद्‌प्युत्तमः सेकः श्रीरुद्राध्यायपूर्वकः ।। १७ ।।

जपाद्दशगुणः प्रोक्तो ह्यभिषेको महेशितुः ।
चन्दनैर्बिल्वपत्रैश्च पूजयेदिन्दुशेखरम् ।। १८ ।।

रुद्रैः स्तुवीत देवेशं साम्बं संसारभेषजम् ।
स्तुत्वा रुद्रैर्महादेव सन्निधौ गणपो भवेत् ।। १९ ।।

रुद्रैर्होमं प्रकुर्वीत चरुणामधुसर्पिषा ।
नामभिर्देवदेवस्य स्वाहान्तैश्च पृथक् पृथक् ।। २० ।।

ग्रहारिष्टे समुत्पन्ने उत्पाते क्ष्मादिकम्पने ।
देशोपसर्गे दुर्भुक्षे राजचोराद्युपद्रवे ।। २१ ।।

प्रजापशुमृतौ चापि जपहोमार्चनं चरेत् ।
रुद्रैर्मन्त्रैरयुतशो ध्यायन्देवं पिनाकिनम् ।। २२ ।।

ब्राह्मणैः शाम्भवैरेव भस्मरुद्राक्षधारिभिः ।
कारयेद्विधिवद्राजा धनाढ्यो वापि कश्चन ।। २३ ।।

गावो भूमिर्हिरण्याद्याः प्रदेयाः शक्तिसारतः ।
शाम्भवेभ्यः सदा रोगतापपापैः प्रमुच्यते ।। २४ ।।

रुद्रमन्त्रजपे योग्याः शाम्भवा एव केवलम् ।
अतिरुद्रविधानं वा महारुद्रमथापि वा ।। २५ ।।

कुर्यात्सर्वोपसर्गेभ्यो न भयं जायते क्वचित् ।
घृतधारां पातयेताविच्छिन्नां रुद्रमन्त्रतः ।। २६ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वह्नौ कुण्डे शिवं ध्यात्वा शाम्भवाष्टोत्तरैः शतैः ।
एकादशानुवृत्त्यैवं मण्डलं धनधान्यवान् ।। २७ ।।

मुक्तः शिवमयो भूयादकामः कामवान् यदि ।
सर्वकामानवाप्नोति वत्सरान्ते न संशयः ।। २८ ।।

गोष्ठे वापि नदीरीते रुद्रक्षेत्रे शतोत्तरम् ।
जप्यैव कर्म कृत्वापि फलं विन्देद्दशोत्तरम् ।। २९ ।।

क्षीराभिषेकं लिङ्गे तु रुद्रमन्त्रैः समाचरेत् ।
न भूयस्स्तन्यपो मातुर्भविष्यति न संशयः ।। ३० ।।

यो रुद्रे वा नमस्कारं प्रदक्षिणमथापि वा ।
कुर्याच्छिवालये शम्भोः सन्निधौ स तु मुक्तिभाक् ।। ३१ ।।

रुद्रमन्त्रैः शूलिनं यः स्तुवन्नर्तनमाचरेत् ।
स शम्भोर्गणपो भूयाद्वत्सरेण न संशयः ।। ३२ ।।

अविमुक्ते शिवक्षेत्रेष्वन्येष्वपि यथा बलम् ।
रुद्रं जपन्प्रमुच्येत पापेभ्यो नात्र संशयः ।। ३३ ।।

यो बिल्वमूले रुद्रांश्च जपेद्ध्यायन्महेश्वरम् ।
स कोटिरुद्रसाम्यस्य फलं लब्ध्वा विमुच्यते ।। ३४ ।।

जाबाला आमनन्त्येव महिमां रुद्रजापिनः ।
किं जप्येनामृतमिति रुद्रैरेवेति सा श्रुतिः ।। ३५ ।।

यतिश्च प्रजपेन्नित्यं वने वर्णी गृही तथा ।
यावन्नमोऽन्तं तु यतेरन्ये तु गृहमेधिनः ।। ३६ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्र स्थितो रुद्रजापी तत्र शम्भुः स्थितः सदा ।
तस्मै दत्तं शाम्भवाय दत्तं तच्छम्भवे सदा ।। ३७ ।।

गां भूमिमथ वासो वा धनं धान्यं हिरण्यकम् ।
दत्वा शिवप्रसादस्य पात्रं श्रीरुद्रजापिने ।। ३८ ।।

एकवारं जपन्रुद्रं तद्ग्रामे शान्तिमृच्छति ।
ग्रामे अस्मिन्ननातुरमिति मन्त्रार्थपारगः ।। ३९ ।।

शतवारं तु नगरे पुरेऽयुतजपाद्भवेत् ।
तत्रस्थानां शुभं भूयाद्यत्र रुद्रजपो भवेत् ।। ४० ।।

कुम्भं संस्पृश्य यो रुद्रं सोदकं प्रजपन् द्विजः ।
स्नापयेच्चापि रोगार्त्तं रोगी रोगैः प्रमुच्यते ।। ४१ ।।

वन्ध्या कुमारं सूते चातीव प्रेमास्पदं स्थिरम् ।

एवं रहस्यमनघं शतरुद्रमन्त्र-
जाप्याभिषेकनियमैः शिवपूजनेन ।
तस्मै प्रसीदति सदा शशिखण्डमौलि-
राखण्डलाजहरिवन्दितपादपीठः ।। ४३ ।।

रुद्राध्यायजपानुरक्तहृदया रुद्राक्षभस्मादरा
जप्त्वा वाप्यषिच्य वा शशिमहाचूडोरुलिङ्गं सदा ।
मूढो वाप्यथपण्डितो यतिवरो भूयाच्छिवाग्रेसरो
विष्णुब्रह्ममरुद्गणार्चितपदो नन्दीशतुल्यो गणः ।। ४४

।। इति श्रीशिवरहस्ये अष्टमांशे द्वादशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। त्रयोदशोऽध्यायः ।।

काश्यप उवाच

श्रीबिल्वाराधनस्यापि महिमां ते वदाम्यहम् ।
श्रृणुष्व सावधानेन प्रसादप्रदमीशितुः ।।

बिल्वः पूर्वं शिवेनैन मनसा कल्पितस्तरुः ।
संसारसागरोत्तारहेतवे यत्र पूजने ।। २ ।।

पापतापविनाशाय कैलासाचलतो हरः ।
समानीयाथ भूभागे स्थापयामास लीलया ।। ३ ।।

तमाह गौरी विनयाच्छशिखण्डेरमीश्वरम् ।
आनीलो यस्तरुः शम्भो भूभागे केन हेतुना ।। ४ ।।

तव प्रियकरो नित्यं कैलासे पर्वतोत्तमे ।
रत्नालवालमध्यस्थतन्मूलेषु स्थितं त्वया ।। ५ ।।

यथा मयि तथा प्रीतिर्बिल्वेऽस्मिंस्तव शङ्कर ।
सर्वदा सर्वकालेषु मया सम्पूजितो भवान् ।। ६ ।।

कैलासमौलिलिङ्गेषु कैलासाख्येषु शङ्कर ।
एतत्पत्रैर्महादेव कोमलाऽऽरक्तजैर्दलैः ।। ७ ।।

सर्वेषां सुलभः कामहेतुना[1] क्रियते तरुः ।
इत्थं देव्या वचः श्रुत्वा स गौरीरमणो हरः ।। ८ ।।

उवाच सर्वहितकृद्देव्याः पद्माननश्रियम् ।
अक्षिभिर्वीक्ष्य तामाह सम्फुल्लमुखपङ्कजः ।। ९ ।।

1. केन हेतुना

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

धन्ये मान्ये त्वया पृष्टं मम मन्ये मनोरथम् ।
तच्छृणुष्व महादेवि रहस्यमिदमद्भुतम् ।। १० ।।

गोप्यं हृद्यं ममेदं हि न प्रकाश्यमिदं त्वया ।
मम नेत्रसमुद्भूतो मार्ताण्डश्चण्डविक्रमः ।। ११ ।।

सर्वेषां तेजसो राशिरीशानात्मक एव सः ।
स चतुर्दशलोकोत्थतमोनाशाय कल्पितः ।। १२ ।।

चन्द्रोऽप्योषधिराट् क्लृप्तो मम सव्योरुनेत्रकः ।
अतिफालतलोद्भूतनयनो लोकदाहकृत् ।। १३ ।।

न तु पापविनाशाय कल्पितः कश्चनामरः ।
तदर्थं चिन्तयित्वाहमसृक्षं बिल्वमेव हि ।। १४ ।।

मम प्रियकरो नित्यं तरुराजोऽयमीश्वरि ।
यथा त्वयि सदा प्रीतिर्बिल्वेऽप्यस्मिन्सदा मम ।। १५ ।।

मद्रूपो वृक्षराजोऽयं वृक्षाणां पतिरस्म्यहम् ।
रुद्रगीतोऽहमीशानि पापभेदाय सृष्टवान् ।। १६ ।।

बहु च ब्राह्मणेनोक्तो ज्योतिर्बिल्वेति पार्वति ।
यतो मदक्षिसम्भूत आदित्यः समजायत ।। १७ ।।

बिल्वो ममाक्षसम्भूत उभयोर्जनकस्त्वहम् ।
सोमस्याप्यस्मि जनकः सर्वेषां श्रुतिचोदितः ।। १८ ।।

ब्रह्मणो जनकश्चाहं विष्णोरिन्द्रस्य पार्वति ।
मत्तो यतोऽभवद्बिल्व आदित्योऽपि महेश्वरि ।। १९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वेदेऽपि यजुषोभागे प्रोक्त आदित्यसोदरः ।
तमोनाशाय सृष्टोऽयमादित्यस्तपतां वरः ।। २० ।।

पापनाशाय सृष्टोऽयं बिल्वो भूतलमाश्रितः ।
पापानां पापिनां वापि दर्शनार्चनतः स्वयम् ।। २१ ।।

पापं हरति वृक्षोऽसौ दर्शनस्पर्शनार्चनैः ।
त्रिदळं बिल्वपत्रं च त्रिगुणात्मकमेव हि ।। २२ ।।

ब्रह्मा विष्णुश्च रुद्रश्च वृक्ष(बिल्व)पत्रत्रये स्थिताः ।
तस्मादयं वृक्षराजो मत्प्रियः पापनाशकः ।। २३ ।।

सर्वेषां सर्वपापानि नाशयत्येव कृत्स्नशः ।
यथा तमोगुणं कृत्स्नं नाशयेद्दिवि संस्थितः ।। २४ ।।

तथा भूमिगतो बिल्वः पापनाशाय शङ्करि ।
लोकानां पापनाशार्थं समानीतो मयाम्बिके ।। २५ ।।

कैलासमौलितो बिल्वपत्रेणार्चन्तु मां जनाः ।
इत्येवं कृपया पापान् दृष्ट्वा नरकदुःखितान् ।। २६ ।।

असङ्ख्यान्मानवांश्चापि मुनीनपि महेश्वरि ।
लोकपालानुतापेन समानीतो भुवं प्रति ।। २७ ।।

अर्चन्ति मां सुकृतिनो बिल्वपत्रैस्त्रिशाखकैः ।
कोमलैर्वा परिम्लानैः शुष्कैः पर्युषितैरपि ।। २८ ।।

तेन मुक्तिं प्रयान्त्येते बिल्वैर्लिङ्गार्चनेन मे ।
बिल्वपत्रार्चनाभावे मम पूजैव निष्फला ।। २९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सर्वोपचारक्लृप्तापि बिल्वपत्रविवर्जिता ।
तस्माद् बिल्वार्चनेनैव सर्वेषां मुक्तिदोह्यहम् ।। ३० ।।

धन्यः पूजयते बिल्वैर्धन्यो मामभिवीक्ष्यते ।
नाधन्यः कीर्तयेन्मां हि पूजने तस्य का कथा ।। ३१ ।।

यो बिल्वपत्रं सङ्गृह्य रक्षति प्रीतमानसः ।
मत्पूजार्थं महादेवि शुष्कं पर्युषितं तु वा ।। ३२ ।।

त्रिपत्रमेकपत्रं वा पातयेल्लिङ्गमस्तके ।
तेन[1] स्ववंशगैः सर्वैर्मदग्रे क्रीडते गणः ।। ३३ ।।

एकेनापि च बिल्वेन सकृत्सम्पूजयेद्धि माम् ।
स मुक्तो मोचयेदन्यानिति विद्धि महेश्वरि ।। ३४ ।।

सर्वपुण्यात्प्रियतरं पत्रैर्वा परमेश्वरि ।
बिल्वपत्रैः सदा देवि यथा प्रियतरो गुहः ।। २५ ।।

तथा बिल्वार्चनेनैव सर्वेषां मुदितोऽस्म्यहम् ।
कृतानन्तमहापापोऽप्यनायासेन मुच्यते ।। ३६ ।।

बिल्वपत्रैश्च सम्पूज्य मल्लिङ्गमभिवीक्ष्यते ।
प्रातः सङ्गवमध्याह्ने सायाह्नेऽपि प्रदोषके ।। ३७ ।।

सोमवारे चतुर्दश्यां पर्वस्वपि विशेषतः ।
बिल्वपत्रैः समभ्यर्च्य सर्वसिद्धिं लभेन्नरः ।। ३८ ।।

1. तेन पुण्यविशेषेण स बिल्वार्चको गणोभूत्वा मदग्रे क्रीडतिः । नासौ स्वयमेक एव, किन्तु स्ववंशजैः सर्वैरपि सहितः । अनेन बिल्वपत्रार्चकः स्वयमपि तरति, स्ववंशजानपि तारयति इति उक्तं भवति ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मम प्रियतरो भूयाद्ब्रह्मतत्वं च विन्दति ।
सुवृत्तो वापि दुर्वृत्तो बिल्वैरभ्यर्च्य मां शिवे ।। ३९ ।।

स सर्वपूज्यो भवति स तपस्वी मुनिः स्वयम् ।
सर्वतीर्थेषु सुस्नातः सर्वयज्ञेषु दीक्षितः ।। ४० ।।

स च सर्वमहानन्दकृत्तमो हृत्तमो मम ।
यो बिल्वपत्रशतकैः सहस्रैरपि लक्षकैः ।। ४१ ।।

कोटिभिर्बिल्वपत्राणां समर्चनकरो भवेत् ।
स एव धन्यो मान्यो मे गणेन्द्रो रजताचले ।। ४२ ।।

यो बिल्वं पोषयेद्भक्त्या जलदानादिभिः शिवे ।
स च वंशयुतो देवि भवेत्सर्वगणाग्रणीः ।। ४३ ।।

बिल्वपत्रैर्बिल्वमूले लिङ्गमभ्यर्चितं मम ।
तेन त्रैलोक्यलिङ्गानि पूजितानि न संशयः ।। ४४ ।।

ये बिल्ववनकर्तारो बिल्ववन्दनतत्पराः ।
बिल्वलिङ्गेन संसक्ता बिल्वदर्शनतत्पराः ।। ४५ ।।

प्रातरुत्थाय यो बिल्वं प्रयाति प्रीतिपूर्वकम् ।
स कृतानल्पपापोऽपि मुच्यते तेऽपि मुक्तिगाः ।। ४६ ।।

भस्म धृत्वैव बिल्वानां सर्वमेव समाचरेत् ।
बिल्वयुक्तं वनं धन्यं तत्सङ्गाद्वृक्षजातयः ।। ४७ ।।

वल्लीगुल्मादयः सर्वे मम लोके वसन्त्यपि ।
स्थावरत्वं परित्यज्य भवन्ति गणपोत्तमाः ।। ४८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

बिल्वस्यैवानुषङ्गेण शाम्भवस्याङ्गसङ्गवत् ।
बिल्वपत्रार्चनकरौ धन्यौ कण्टकनुन्नकौ ।। ४९ ।।

शङ्खचक्रादि चिह्नैस्ते भवन्ति पृथिवी भुजः ।
बिल्वमूले प्रजप्तो यो मन्त्रः कोटिगिणो भवेत् ।। ५० ।।

शाम्भवं भोजयेद्देवि बिल्वमूले विशेषतः ।
स दरिद्रोऽपि सम्पन्नो भवत्येव न संशयः ।। ५१ ।।

पादौ प्रक्षाल्य नत्वाथ भस्मधारणपूर्वकम् ।
मन्त्रमेनं समुच्चार्य बिल्ववृक्षं समारुहेत् ।। ५२ ।।

नमस्ते बिल्ववृक्षाय नवारुणदलाय च ।
पत्रं ते शिवपूजार्थं गृह्णाम्यद्य क्षमस्व मे ।। ५३ ।।

इति प्रार्थ्य महावृक्षं गृह्णीयात्पत्रमेव हि ।
उत्तराग्रेण पत्रेण पूजनीयोऽहमेव हि ।। ५४ ।।

किं पुनःर्बहुनोक्तेन बिल्वपत्रं मम प्रियम् ।। ५५ ।।

स्कन्द उवाच

इत्युक्त्वा गिरिराजराजतनयामालिङ्ग्य मोदान्वितः
कैलासे वरबिल्वमूलतलके साङ्गे हि लिङ्गे मुदा ।
तत्रत्यैः कुसुमैस्तदीयमगजाकान्तोऽभिजिघ्रंस्थितो
बिल्वार्चाफलमेतदेव भगवान् जानात्यसौ शङ्करः ।। ५६ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे बिल्ववैभववर्णनं नाम
त्रयोदशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। चतुर्दशोऽध्यायः ।।

काश्यप उवाच

शिवप्रसाद[1] योग्यं हि पात्रं श्रीशाम्भः स्वयम् ।
शाम्भवा शम्भुभक्ता ये भस्मरुद्राक्षधारिणः ।। १ ।।

शिवलिङ्गार्चकाः शैवाः शिवैकपरदेवताः ।
शिवलिङ्गैकशरणा मरणेऽपि प्रतिक्षणम् ।। २ ।।

नान्ये सुरार्चनरताः शाम्भवा एव केवलम् ।
शिवैकशरणा एव मनोवाक्कायकर्मभिः ।। ३ ।।

शाम्भवा न विधातारं न विष्णुं नामरान्परान् ।
मनसापि न मन्यन्ते मन्यन्ते तृणतुल्यताम् ।। ४ ।।

शिवभक्तिसमापन्नाः सम्पन्ना एव ते सदा ।
दुर्लभा शाम्भवी भक्तिः प्रसादादेव सा भवेत् ।। ५ ।।

प्रसादः शाङ्करः श्रेष्ठो भविष्यति शिवाज्ञया ।
भावानां भावनां दृष्ट्वा भवः प्रीतो भविष्यति ।। ६ ।।

नो भावो विद्यते तस्य सदा संसारवर्तिनाम् ।
संसारोत्तारका एव शाम्भवाः शङ्कराज्ञया ।। ७ ।।

1. शिवप्रसादजं पात्रं श्रीशाम्भवः केवलं भवे इति मातृकायाम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विष्णुब्रह्मादयो देवा मुनयो मनवस्तथा ।
असुराः किन्नरा वापि सुधाकरधरार्चकाः ।। ८ ।।

ते सर्वे शाम्भवा एव भस्मरुद्राक्षधारिणः ।
शिवैकपरदेवास्ते ते सर्वे शिवचेतसः ।। ९ ।।

शिवप्रणामपरमा भक्ता मुक्तिपथे स्थिताः ।
पञ्चाक्षरपरा एव श्रीरुद्राध्यायजापकाः ।। १० ।।

शिवलिङ्गार्चकाः शैवाः सततं भवपूजकाः ।
भावेन भगवत्प्रीता भवोद्भवपदार्चकाः ।। ११ ।।

भगवान्भव एवेति ये विज्ञायार्चयन्ति ते ।
त्रिपुण्ड्रभस्मनिटिलाः सदाबिल्वादिपल्लवैः ।। १२ ।।

अभिषिच्य सदा नीरैः सायं प्रातर्विशेषतः ।
प्रदोषे सोमवारे च चतुर्दश्यष्टमीषु च ।। १३ ।।

नक्तं नैवेद्यभोक्तारो नियमाच्छङ्करार्चकाः ।
नित्यं प्रदोषनियता मिताहाराः शिवार्चकाः ।। १४ ।।

भक्ताः शैवा द्विजा एवमन्ये वर्णा अपि क्रमात् ।
स्त्रियो वा सङ्करा वापि पूज्य लिङ्गं पिनाकिनः ।। १५

शाङ्करा एव ते सर्वे शिवलिङ्गार्चनोद्यताः ।
पञ्चास्यलिङ्गं पञ्चास्य ध्यानपूर्वं यजन्ति ते ।। १६ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

बिल्वाम्बुजैः समभ्यर्च्य प्रातः सायं विशेषतः ।
हारा दारितपापौघा अमोघाः शङ्कराचर्काः ।। १७ ।।

पञ्चाक्षरेण यो लिङ्गं बिल्वैरभ्यर्च्य शूलिनः ।
पञ्चेन्द्रियकृतैः पापैः पञ्चपापैश्च मुच्यते ।। १८ ।।

शम्भवा एव सम्पूज्याः शिवार्चन परायणाः ।
अनभ्यर्च्य महादेवं मरणेऽपि प्रतिक्षणम् ।। १९ ।।

नान्यत्फलं च गृह्णन्ति नियमामितभाषिणः ।
त एव साङ्गा विज्ञेयाः शिवलिङ्गैकपूजकाः ।। २० ।।

तदङ्गसङ्गतः सद्यः पापभङ्गः प्रजायते ।
मातङ्गकृत्तिवसन पादपूजाप्रभावतः ।। २१ ।।

तेषु दत्तं तथा शम्भुः स्वयं गृह्णाति शङ्करः ।
शिवक्षेत्रै भोजनीयाः पूज्याश्च शिवयोगिनः ।। २२ ।।

अन्यवर्णेष्वपि तथा भस्मरुद्राक्षधारिणः ।
शिवलिङ्गासक्तकण्ठा नीलकण्ठपदार्चकाः ।। २३ ।।

अविमुक्ते च केदारे रुद्रकोटौ मरेश्वरे ।
भृगुतुन्दे नर्मदायां ओङ्कारे च प्रभासके ।। २४ ।।

पुष्करे नैमिशारण्ये महाकाले त्रियम्बके ।
गोकर्णे च कुरुक्षेत्रे श्रीशैले पुण्डरीकके ।। २५ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दक्षिणे तत्र कैलासे वृद्धाद्रावरुणाचले ।
गोपर्वते सह्यमूले श्रीकण्ठे रत्नपर्वते ।। २६ ।।

श्रीमातृशिखरे चैव गजारण्येऽथ जाप्यके ।
कुम्भघोणेऽर्जुने चैव मायूरे श्वेतकानने ।। २७ ।।

कमलालयसंज्ञे च वेदारण्योरुसेतुके ।
हालास्य वेणुविपिने ताम्रपर्ण्यास्तटद्वये ।। २८ ।।

सह्यापगारोधसी च क्षेत्रनिष्ठाश्च शाम्भवाः ।
पूजनीयाः प्रयत्नेन शिवप्रीत्यर्थमेव हि ।। २९ ।।

यत्र भुङ्क्ते शाम्भवस्तु शिवो भुङ्क्ते च तत्र हि ।
पूज्याः सदा दानमानैस्तेन प्रीतो भवेच्छिवः ।। ३० ।।

शिवभक्ता महोत्साहाः शिवार्चनपरायणाः ।
शान्ता दान्ता जितक्रोधाः शिवनामजपादराः ।। ३१ ।।

भस्मरुद्राक्षसम्पन्नाः शिवोत्कर्षैकवादिनः ।
वेदिनो हरतत्त्वस्य शिवक्षेत्रनिवासिनः ।। ३२ ।।

अन्यक्षेत्रप्रत्यभिज्ञारहिता भूतिभाविनः ।
शिवमेव यजन्त्येव सर्वकार्येषु सादरम् ।। ३३ ।।

त एव वैदिका ज्ञेयाः श्रौतपुण्ड्रादिधारिणः ।
श्रौतलिङ्गमिदं प्रोक्तं भस्मरुद्राक्षधारणम् ।। ३४ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रुद्राध्यायजपः श्रौतः श्रौतः पञ्चाक्षरीजपः ।
रुद्रालिङ्गार्चनं श्रौतं श्रौती शिजपस्मृतिः ।। ३५ ।।

श्रौतधर्मार्थनिरताः शाम्भवा एव केवलम् ।
अश्रौतमूर्ध्वपुण्ड्रं तु नैव धार्यं शिवार्चकैः ।। ३६ ।।

नान्यक्षेत्रे वसेन्नित्यं शाम्भवः शम्भुतत्परः ।
नान्यं सुरं वापि नरं किन्नरं वा भजेत्स हि ।। ३७ ।।

एवं ये शिवभक्तिभावनिरतास्ते शाम्भवाः केवलं
दारोदारकुमारबृन्दसहिताः श्रीशङ्करार्चारताः ।
मारापारशराभिघातरहिता वेदान्तसारादरा
मोहापारमहाघसंसृतिभरं हारास्त्यजन्त्येव ते ।। ३८ ।।

अन्ये भूभाररूपाः शिवपदकमलध्यानहीनावमान्या
सामान्याः शिवमन्युदग्धवपुषो जारोपजारोद्भवाः ।
वीरा वाप्यसुराः सुरा नरवराः दुष्टा नराः पामरा
मारारातिपदाम्बुजोज्झितमनस्तापाः सपापा हि ते ।। ३९ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे चतुर्दशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। पञ्चदशोऽध्यायः ।।

काश्यप उवाच

शाङ्करा एव देवेशं स्तुवन्ति भवभाविताः ।
भावनामात्रसुलभो दुर्लभो ह्यकृतात्मनाम् ।। १ ।।

शिव एव हि सर्वेषां शासकस्तारकः सताम् ।
स एव भक्तिभावेन पूजितो भुक्तिमुक्तिदः ।। २ ।।

शिवनैवेद्यतुष्टाङ्गाः सन्तुष्टा ज्येष्ठपूजकाः ।
निष्ठावन्तः कृपावन्तः शिपिविष्टपदाश्रयाः ।। ३ ।।

तुष्टाः पुष्टाः सदा भक्तास्तेजिष्ठाः शिवपूजकाः ।
स्तुवन्ति स्तोत्रवर्येण नृत्यन्त्युग्राग्रतो मुदा ।। ४ ।।

भस्मरुद्राक्षकवचा जटामकुटभूषणाः ।
रुद्राक्षवरकोटीरा रुद्राक्षाङ्गदकङ्कणाः ।। ५ ।।

साश्रुनेत्राः स्खलज्जिह्वास्ते नृत्यन्ति शिवाग्रतः ।
सोत्साहकरताळैश्च शाम्भाः लिङ्गप्रपूजकाः ।। ६ ।।

शिवलिङ्गप्रभासङ्गकृपापाङ्गावलोककाः ।
अनङ्गवरमातङ्गभङ्गसङ्गान्तरङ्गकाः ।। ७ ।।

नृत्यन्ति शाम्भवा एवं स्तुतिं श्रृणु भृशादरः ।
एवं स्तुवन्ति ये शम्भुं शाम्भवाग्रेसरा हि ते ।। ८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हे गौरीरमणारुणाचलपते तूर्णं ममाभ्यर्णगं
मृत्युं वारय तारयाशु दुरितात्सम्पूर्णदृक्सङ्गतः ।
घोरापारभवार्णवाज्जनिजरारोगानुतापैरपि
शम्भो मे मरणक्षणेऽपि शरणं ते पङ्कजाभं पदम् ॥

हे गौरीकुचचारुशैलशिखरापारादरस्वान्तर
मारोद्दामसुदर्पसर्पकुहारापारव्यथासंहर ।
हे काकोदरभूष भूतिद महीधृग्धुर्यबाणासन
मथ्यत्सागरसम्भवोत्तमगरश्रीनीलकण्ठ प्रभो ॥ १० ॥

पाहीशान दयानिधान भगवन्कारुण्यसिन्धो सदा ॥ ११ ॥

हे चन्द्रद्युतिकोटिरञ्जितजटा कोटीर जूटीलस-
द्देव श्रीतटिनीतटोत्तम पटीभूतेभचर्माम्बर ।
हे कालप्रभुवर्य घोटकमहावेदोरुहेषास्तुत
त्रुट्यद्दिक्तट सम्भ्रमोरुनटन पाटीरपङ्काङ्कित ॥ १२ ॥

हे शूलोद्यतहस्त मस्तकलसच्चन्द्रोरुगङ्गाधर
स्वामिन् देवकिरीटकोटिविलसत्पादाम्बुजावाद्य माम् ।
मुस्ताशस्तसमस्तभीतिदमहाकोलोरुदंष्ट्राधर-
वित्रस्ताखिललोकरक्षकमहाशास्तः पितः पाहि माम् ॥ १३

हे गङ्गाम्बुतरङ्गसङ्गसुमहादित्योत्तमाङ्ग प्रभो
मां दुर्बोधमनर्घभूतिविलसत्सर्वाङ्गरागावतात् ।
दिव्योत्तुङ्गभुजङ्गसङ्ग सुमहानन्दाङ्गलिङ्गान्तरं
अग्नीषोमपतङ्गनेत्र करुणादृक्सङ्गतः पाहिमाम् ॥ १४ ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हे फालाक्ष महेश रक्ष करुणामूर्तेऽध्वराध्यक्ष मां
वीक्षाशिक्षितमन्मथाङ्ग सुमहादक्षोरुशिक्षाकर ।
तत्पक्षान्तरदेववृन्दकदन ध्वंसीकृताधोक्षज
पाह्यक्षेशवराश्रय त्रिभुवनाध्यक्ष प्रभो पाहि माम् ।। १५ ।।

त्र्यक्षापातदयाघनान्तरदृशा संवीक्ष्य मां सर्वदा
हे शम्भोऽनुपमोरुसुन्दर जटाभ्राजच्छशाङ्क प्रभो ।
प्राज्याज्याप्लुतवह्निवक्त्रहवनप्राचुर्यराज्यप्रद
भैषज्योत्तम देव देव सुमहापापान्विते मय्यति-
हृत्तापेन दिवानिशं प्रदहिते शम्भोऽनुकम्पां कुरु

हे कालान्तक शान्तिदान्तिनिरतस्वान्तान्तरङ्गस्थित
मत्तानन्तजगत्सरान्तरसुहृत्संसारतान्तं हि माम् ।
भ्रान्तं भीतमशान्तबुद्धिमनिशं कामान्तरङ्गं सदा
मां रक्षाशु दयानिधे हर उमाकान्त प्रभो शङ्कर ।। १७ ।।

हे शङ्कर स्मरहरान्धककालशत्रो
संसाररोग हरवैद्य सुरोत्तमाद्य
पाह्यद्वय श्रुतिशिरस्स्तुतपाद गद्य-
पद्यस्तुति प्रकटितप्रमथाधिनाथ ।। १८ ।।

विद्युत्सुचञ्चलललनरदेहमेतँ-
ल्लब्ध्वापि ते पदयुगं न भजामि मुग्धः ।
हे व्यालमाल गरशोभितकण्ठमूल
दिव्यत्रिशूलकर कालगलातितिलील ।। १९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कोलाहलध्वनिकरोत्तमफालमूल-
ज्वालानलायितपुरत्रयतूल शम्भो ।
पाहीन्दुधाम सुललाम जटोत्तमाङ्ग
मालायिताब्जजकपाल तलातलस्थ ।। २० ।।

हे विश्वाधिक विश्वबन्धरचितामेय यमध्वंसक
कायापायमपाकुरुष्व भगवन् मायान्धकारं हर ।
मेयं ते पदपङ्कजं प्रतिभवेऽप्येवं मुहुःसिध्यतां
हेया मे विषया भवन्तु नियतं हेयं न ते पूजनम् ।। २१ ।।

मीनध्वजाद्रिषु परं परिखिन्नचित्तं
हृत्तापयुक्तमथ वित्तगणार्जनेन ।
पित्तोल्बणेन सततं भ्रमदन्तरङ्गं
आशाशमाय करुणां कुरु पाहि दीनम् ।। २२ ।।

हे स्वर्णवर्णसदृशोत्तमकर्णिकार-
मन्दारकुन्दकरवीरसदम्बुजार्च्य ।
बिल्वोत्तमाङ्ग सुकदम्बक चम्पकादि-
दूर्वार्च्य शङ्कर विभो परिपाहि दीनम् ।। २३ ।।

हे विश्वनाथ मथितान्तकमन्मथाङ्ग
गौरीसनाथ मम नाथ सुरप्रमाथ ।
मां रक्ष शङ्कर अनाथजनप्रमाथं
नाथाधुनाऽध्वनिकृते वरमद्रिनाथ ।। २४ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हे विश्वाधिक विश्ववन्द्यचरितास्ते या व्ययेश प्रभो
भो भर्ग त्रिपुरान्धकान्तक महाकामेश कामापह ।
मत्कामं परिपूरयाशु भगवन् शम्भो प्रसीदाधुना
इत्येवं परिनृत्यति प्रतिदिनं शम्भोर्मुदे शाङ्करः ।। २५ ।।

एवं स्तुत्यमुमाधवं[1] वररमानाथाक्षिपादाम्बुजं
विश्वाधीश्वरमिन्दुकुन्दधवलं स्वार्धाङ्गगौरीसखम् ।
भर्गं शङ्करमम्बिकासहचरं देवं क्षयद्वीरकं
पारावारमहाघसागरमहो सर्वस्तरेत्तत्क्षणात् ।। २५ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे पञ्चदशोऽध्यायः ।।

1. संस्तुत्यैवमुमापतिम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। षोडशोऽध्यायः ।।

काश्यप उवाच

ये स्तुवन्ति महादेवं ते वै हाराः प्रकीर्तिताः ।
येऽर्चयन्ति महादेवं ते वै शाम्भवसत्तमाः ।। १ ।।

ये ध्यायन्ति महेशानचरणाम्बुजमुत्तमम् ।
ये वै क्षेत्रेषु निरता विरताश्चन्यवस्तुषु ।। २ ।।

आनन्दवनवासेन सर्वदानन्दमेदुराः ।
शिवलिङ्गार्चका एव ते वै साङ्गाः प्रकीर्तिताः ।। ३ ।।

ये वै नैवेद्यभोक्तारस्ते वै भावाः प्रकीर्तिताः ।
ये नामनिरताः शम्भोरन्यनामपराङ्मुखाः ।। ४ ।।

ते वै माहेश्वराः प्रोक्ताः [1]पात्रभूताघहारिणः ।
शिवभक्तार्चका ये वै धनधान्यादिभिर्मुदा ।। ५ ।।

शाङ्करास्ते सदाज्ञेया [2]दृष्टास्स्पृष्टाः प्रकादिनः ।
ये भस्मोद्धूलनोद्युक्तास्ते वै शैवाः प्रकीर्तिताः ।। ६ ।।

अग्निरित्यादिभिर्मन्त्रैः[3] सर्वदा येऽनिशं मुदा ।
दग्धपापास्त एवेति विज्ञेयाः शाम्भवोत्तमाः ।। ७ ।।

1. पात्रभूताश्च ते अघहारिणश्चेति भावेऽयं प्रयोगः ।
2. तैः शाङ्करैः स्पृष्टाः दृष्टाश्च, प्रसादिनः श्रीशङ्करप्रसादभाजः ।
3. अग्निरित्यादिभिर्मन्त्रैः ये भस्मोद्धूलनपराः ते शैवाः भवन्ति, दग्धपापाश्च भवन्ति इत्यन्वयः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्र्यायुषं त्रिपुण्ड्रैश्च तथा च त्र्यम्बकैरपि ।
त्रिपुण्ड्रधारिणः सर्वे ते रुद्रा[1] नात्र संशयः ।। ८ ।।

अघोरमन्त्रतो ये वै सदा रुद्राक्षधारिणः ।
कण्ठकर्णगलाद्यङ्गबाहुमस्तककेष्वपि ।। ९ ।।

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
नैवेद्यं ये शिवे दद्युर्भुञ्ज्युर्वा शङ्करार्पितम् ।। १० ।।

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
ये धारयन्ति चिह्नानि देवदेवस्य शूलिनः ।। ११ ।।

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
ये धारयन्ति रुद्राक्षान्त्सदा वै शाङ्करोत्तमाः ।। १२ ।।

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
ये रुद्राध्यायजप्येन जपन्ति शिवतुष्टये ।। १३ ।।

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
ये रुद्रैः स्वात्मकैर्नित्यमभिषेक्ष्यन्ति शङ्करम् ।। १४ ।।

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
ये पञ्चाक्षरासक्ता तेन ये पूजयन्ति ते ।। १५ ।।

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
ये वै बिल्वार्चनप्रीता ये वै बिल्वार्चनप्रियाः ।। १६ ।।

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
बिल्वपत्रार्चका ये वै त्रिकालं लिङ्गमस्तके ।। १७ ।।

1. रौद्रा इति वा ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
ये लिङ्गार्चनव्यग्रा अग्रा उग्रार्चने रताः ।। १८ ।।

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
ये पञ्चगव्यैर्नियतास्त्रिकालमभिषेचकाः ।। १९ ।।

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
फलजालरसैः शम्भोरभिषेककराः सदा ।। २० ।।

ते शाम्भवाः सदा ज्ञेयाः शिवस्यैव प्रसादिनः ।
पाटीरागरुकस्तूरीचन्द्रचन्दनलेपकाः ।। २१ ।।

शम्भोर्लिङ्गे सदा तुङ्गे ह्यसङ्गाः [1]सङ्गतत्पराः ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। २२ ।।

बिल्वपत्राम्बुजवरैः करवीरार्कचम्पकैः ।
मन्दार पारिजातादिमालापुष्पप्रदा हि ये ।। २३ ।।

शम्भोर्लिङ्गे विशेषेण त्रिकालं च प्रदोषके ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। २४ ।।

दिव्यवस्त्रप्रदातारो महेशाय समुत्सदा ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। २५ ।।

ये शम्भो रत्नपुष्पप्रदातारो विशेषतः ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। २६ ।।

1. ते सङ्गतत्परा अपि असङ्गा एव ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सुवर्णरत्नपुष्पाद्यैर्बिल्वपत्रार्चका हि ये ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। २७ ।।

ये कृष्णागरुसाम्राणिगुग्गुलैर्धूपदायिनः ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। २८ ।।

घृततैलमहादीपं ये दद्युः श्रीशिवालये ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। २९ ।।

ये नैवेद्यप्रदातारो भक्ष्यभोज्यादिभिर्मुने ।
ये ताम्बूलप्रदातारो ह्यहर्निशमुमापतेः ।। ३० ।।

ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।
ये छत्रवृन्ददातारः सर्वदा शिवमस्तके ।। ३१ ।।

ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।
ये वै चामरदातारो हंस [1]पाण्डरमुत्तमम् ।। ३२ ।।

ये पताकाप्रदातारः सर्वदा ये शिवाग्रतः ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। ३३ ।।

ये चादर्शप्रदातारो महादेवाग्रतः सदा ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। ३४ ।।

ये मृदङ्गमहावीणादुन्दुभीवादने रताः ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। ३५ ।।

1. उत्तम हंसपाण्डरचामरप्रदातारः इति वक्तव्येऽयं प्रयोगः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तौर्यत्रिकादिकर्तारो नृत्तं स्त्रीणां प्रदायकाः ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। ३६ ।।

ये शिवालयकर्तारः प्रकारवरगोपुरम्[1] ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। ३७ ।।

ये शिवारामकर्तारः सर्वपुष्पोपशोभितम् ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। ३८ ।।

ये रथोत्सवकर्तारो वृषवाहनमुत्तमम् ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। ३९ ।।

ये शाम्भवान्नदातारो यतीनामपि वा पुनः ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। ४० ।।

ये प्रदोषार्चनरताः सर्वपूजाभरैः शिवे ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। ४१ ।।

ये सोमवासरे सायं शिवलिङ्गार्चने रताः ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। ४२ ।।

अष्टम्यामष्टमूर्तिं ये पूजयिष्यन्ति भक्तितः ।
ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।। ४३ ।।

ये भूतायां भूतनाथमर्चयन्ति दृढव्रताः ।
ये पर्वण्यपि वाभ्यर्च्य शर्वरीनाथधारिणम् ।। ४४ ।।

1. प्रकारवरगोपुरप्रधान शिवालयकर्तार इति सङ्गतः पाठः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।
ये नामनिरताः शम्भोः सर्वदा रसनोज्ज्वलाः ।। ४५ ।।

ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।
ये भक्तार्चनतस्तुष्टाः सर्ववर्णेष्वपि ध्रुवम् ।। ४६

महेशस्य विशेषेण शाम्भवाग्रेसरा हि ते ।
येऽर्चयन्ति महादेवं त्रिवारं भस्मधारिणः ।। ४७ ।।

ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।
ये क्षेत्रनिरताः शम्भोर्विरक्ता विषयेष्वपि ।। ४८ ।।

ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।
ये रुद्राध्यायनिरताः सदा पञ्चाक्षरादराः ।। ४९ ।।

ते शाम्भवाः महादेवप्रिया नास्त्यत्र संशयः ।
येऽथर्वणशिखाजाप्यनिरता वेदपारगाः ।। ५० ।।

एवं शाम्भवसन्तमाशिवमहाचारानुरागादरा
दारोदारकुमारमारशरजव्यापारसंहारकाः ।
पारावारविकारसंसृतिभरं ते नाप्नुवन्ति ध्रुवं
हाराः शङ्करपादपद्मनिरता विश्वेश्वरस्यार्चकाः ।। ५२ ।।

ये शाम्भवाः शशिकलाशकलोत्तमाङ्ग-
लिङ्गोत्तमाङ्गमनवद्यसुचन्दनाद्यैः ।
सम्पूजयन्ति किल पापमतङ्गभङ्गाः
शान्तास्त्वसङ्गहृदयाः शिवलिङ्गसङ्गाः ।। ५३ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे षोडशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। सप्तदशोऽध्यायः ।।

काश्यप उवाच

भस्मत्रिपुण्ड्रपरिचिन्ति(ह्नि)त सर्वगात्रा
रुद्रत्रिणेत्र पदभावन सर्वमित्राः ।
वित्रस्तपातकवरा वरपञ्चवक्त्रा-
स्ते शाम्भवा भुवनमाशु पवित्रयन्ति ।। १ ।।

फालाक्षिकर्णगलहृत्कटिनाभिकुक्षि-
कण्ठोरुबाहुपरिचिह्नित सर्वगात्राः ।
सुत्रामवन्दितपदा वरसत्रवर्य-
पुण्याधिकाः किल महोन्नतशङ्करास्ते ।। २ ।।

पञ्चाक्षराक्तहृदयाः सदयाः सदैव
मोदाय सर्वतनुषु न मदाय तेऽपि ।
बोधाय सर्वजगतां तदुमासहाय
पादारविन्दभजकाय हिताय तेऽपि ।। ३ ।।

ते शाङ्करा भुवनमाशु पवित्रयन्ति
रुद्राध्यायजपेषु सक्तहृदया विश्वाकृतिध्यायिनः ।
शम्भोः सर्वजगत्पतित्वगुणतो मन्त्रार्थसारादराः ।। ४ ।।

ये यौवनोन्नतमदेऽपि सदैव शम्भु-
पादारविन्दभजनाय मुदा प्रवृत्ताः ।
सारोद्दामविकार पूरितहृदोऽप्युज्झित्य तत्पातकं
हेयाः पापनिकायमीशकृपया न प्राप्नुवन्ति ध्रुवम् ।। ५

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ये शम्भुलिङ्गशशितुङ्गमहोत्तमाङ्ग-
गङ्गातरङ्गशशितुङ्गकृताङ्गभङ्गम् ।
मातङ्गवक्त्रवरतातमतङ्गभङ्गं
शान्तान्तरङ्गहृदयाः परिशीलयन्ति ।। ६ ।।

ये बिल्वमन्दारसुचम्पकाद्यै
रिन्दीवरैरपि कदम्बजकर्णिकारैः ।
माकन्दकुन्दजलजैः करवीरपुष्पै-
र्योऽर्च्याभिनन्दति मुदा स तु शाम्भवो हि ।। ७ ।।

ये पाटीररसोरुसन्मृगमदामोदप्रभाभावितं
देवैर्वन्दितमिन्दुचूडविलसच्छैलेयलिङ्गं मुदा ।
यः कुर्यान्निशि वा प्रदोषसमये सत्तालवृन्तोद्भवै-
र्वातैर्वाति वसन्तकेतकभवद्गन्धैर्न दुःखं लभेत् ।। ८

शाल्यन्नं मधुराज्यसूपदधिजक्षीरादिमध्वादिभिः
शाकापूपगुडाक्तभक्ष्यक सदागोधूमपूर्णोद्भवाम् ।
नैवेद्यं सुमनोहरं भुवि सदा हृद्यं प्रदत्वा शिवे
माद्यं मोदकसम्भवान्त्सुमधुरान्दत्वा स मुक्तो भवेत् ।।

यो धूपैस्तगरागरूद्भवमहासाम्राणि सद्गुग्गुलु
चन्द्रोद्यद्वरखण्डसान्द्रसुमहादीपैर्घृताक्तैः शिवे ।
दध्याद्यः शशिशेखरोत्तममहालिङ्गालये शङ्करे ।
भूत्वा ज्ञाननिदान साधकवरोभूयात्सदैवाशु मे ।। १०

यो नीराजयति प्रदोषसमये दीपावलीनां शतैः
साहस्रैरपि चन्द्रशेखरमहालिङ्गं स मुक्तो भवेत् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सछत्रैरखिलैर्महेन्दुसदृशैर्दद्याच्छिवायाशु वै
स ब्रह्मा भवितेन्दुचूडभजनात्सच्चामरादर्पणैः ।
पताकाभिः शम्भोर्विविधपटगर्भाभिरभितः
प्रभावोद्भावैर्यो मरुदरुणलीलाभिरपि वै ।। १२ ।।

यस्स्तौति शम्भुं परया च भक्त्या
प्रदक्षिणप्रक्रमणेन भक्त्या ।
लिङ्गालये यः कुरुते प्रदक्षिणी-
प्रणामपूर्वं स तु शैववर्यः ।। १३ ।।

यः स्तौति शम्भुं सकृदेव भक्त्या
शम्भो शिवेति शशिधामधरेति भक्त्या ।
गङ्गाधरेति प्रथितोरु दक्ष-
शिक्षाध्वराध्यक्ष महोक्षवाह ।। १४ ।।

फालाक्ष विश्वपरिरक्षक मोक्षमार्ग-
मीशान देहि इति वक्ति स शैववर्यः ।
यः शैववर्यतिलको भवतीन्दुचूड-
पादारविन्दभजनेन नयेत्सकालम् ।। १५ ।।

नालं भवोद्भवजने स च कालकालः
श्रीशूलपाणिचरणस्मरणप्रभावः ।। १६ ।।

अभ्यर्णं मरणं च वीक्ष्य सभयो भावो हि भस्मादृतः
तूर्णं पूर्णमतिः सदैव सततं किं चान्नपूर्णापतिम् ।
विश्वेशं समुपास्य मुक्ति परमानन्दं लभेच्छाम्भवः ।। १७ ।।

यो गौरीरमणार्चननेन सरिणिं मुक्तेर्विमार्गत्यहो
दूर्वा(पा)मार्गदलैः सुबिल्वजदलैः सम्पूजयेच्छाम्भवः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दारान् सर्वधनानि गोधनवरं वीरान् कुमारानपि
विद्यावादरयं समेत्य परमां प्राप्नोत्यहो निर्वृतिम् ।। १८

आयाति मृत्युर्निकटेन चायु
रायाति यत्तद्गतमेव शम्भोः ।
पश्यामि शश्वन्निकटे सुवर्ण-
वृक्षोरुसत्काननमम्बिकेश ।। १९ ।।

तस्मात्प्रमद्ये शरणं त्वदीयं
पद्मप्रभावं चरणं सदाहम् ।।

शम्भो योनिमुखाच्च निस्सरणमप्युत्क्रान्तिकालव्यथा-
त्रुट्यन्मर्मतनुप्रकर्षजनितश्रान्त्या मुमूर्षामपि ।
तस्मिन्नस्तमिते प्रपञ्चमिहिका व्यापारकोलाहल-
क्रन्दद्बालकदम्बबन्धुनिवहे चित्ते कथं ते पते ।।

मरणोत्तरमप्यतीव शोकं
कुर्वाणं मामतीव सौरिगेहे ।
अनुभवशतसङ्कुले निपात्य
न सुखं किञ्चन वञ्चितोऽस्मि शम्भो ।।

यो बिल्वच्छदमादराच्छिवमहालिङ्गोत्तमाङ्गे दध-
त्प्रातः सङ्गव पुङ्गवोरुवहनं पुण्ये प्रदोषेऽपि च ।
मातङ्गादितुरङ्गगोधनमहीदानान्नपानादिकं
पुण्यं प्राप्य मुदा सदैव उदयत्येषोहिभावोऽर्कवत्[1] ।।

।। इति श्रीशिवरहस्ये अष्टमांशे सप्तदशोऽध्यायः ।।

1. भावः भवस्य शिवस्य अयं शिवभक्तः ।।
2. अस्मिन्नध्याये विचित्र-अननुगत वृत्तानि पद्यानि शिवभावनाभावितमनस्केन कविना निबद्धानि इति अवगन्तव्यम् ।

CC-0. SarasTvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। अष्टदशोऽध्यायः ।।

काश्यप उवाच

तस्मात्त्वां पतगश्रेष्ठ विद्यया वीक्षयाम्यहम् ।
पञ्चाक्षरपरो यस्तु स सर्वबलभाजनम् ।। १ ।।

भुक्तिमुक्त्योः स वै पात्रं त्रिणेत्रप्रियकृत्तमः ।
स्वतन्त्रोऽपि महादेवस्तन्मन्त्रवशगो भवेत् ।। २ ।।

यस्तु पञ्चाक्षरपरः पञ्चास्य ध्यानपूर्वकम् ।
स पञ्चत्वविहीनात्मा भवेदेव शिवः स्वयम् ।। ३ ।।

पञ्चाक्षराश्रयाः सर्वे ब्रह्मविष्णुमरुद्गणाः ।
पञ्चाक्षराश्रयाः सर्वे मुनयो ये तपोधनाः ।। ४ ।।

असुरा यातुधानाश्च सिद्धविद्याधरादयः ।
गन्धर्वाः किन्नरा यक्षास्तथा किम्पुरुषादयः ।। ५ ।।

मन्त्रेणानेन देवेशं पूजयन्ति विधानतः ।
लिङ्गे बिल्वदलैर्नित्यं नीरैरपि यथाविधि ।। ६ ।।

यथाविभवसारेण भक्तिरेवात्र कारणम् ।
फलमद्य दरिद्राणां सममेवात्र कारणम् ।। ७ ।।

भक्त्या प्रसीदति शिवो भक्त्या मुक्तिं प्रयच्छति ।
भक्त्यैव लभ्यते ज्ञानं वेदवेदान्तवाक्यजम् ।। ८ ।।

तत्वं ब्रह्मेति वाक्यानां भावना भक्तिरेव हि ।
मुक्तिप्रदं महादेवमभ्यस्तैच्च विधी रथी ।। ९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कथमन्ये सुराः सर्वे मुक्तिदानक्षमा द्विज ।
पशवः सर्वदेवाश्च स पतिः परमेश्वरः ।। १० ।।

स एव मोचकस्तेषां पशूनां पतिरीश्वरः ।
भक्त्या लिङ्गेऽर्चितो बिल्वैः पाशेभ्यो मोचयेत्पशून् ।। ११

मायापाशाः प्रकीर्त्यन्ते कामक्रोधोरुलोभकाः ।
मदमात्सर्यमोहाद्या ईषणादित्रयं[1] तथा ।। १२ ।।

वर्णाश्रयं[2] कुलं जातिधनाद्यखिलसम्पदः ।
पुण्यपापादयश्चैव स्वर्गश्च नरकं तथा ।। १३ ।।

देवतिर्यङ्नराकारज्ञानं तत्सौख्यविभ्रमः ।
संसारे सौख्यताज्ञानं विषयादिसुखभ्रमः ।। १४ ।।

विचाररहितं चेतो धारणं गुणिनां त्रयम् ।
एते पाशाः प्रकीर्त्यन्ते प्रतिपूजा(ज्य)प्रभावतः ।। १५ ।।

शिवलिङ्गार्चनेनैव पाशेभ्यो मुच्यतेऽखिलैः ।
अग्निरित्यादिभिर्भस्म धृत्वा तद्देह एव हि ।। १६ ।।

परिमृज्याण्डजेशस्य काश्यपः शाम्भवोत्तमः ।
ददौ पञ्चाक्षरीविद्यां सर्वापापप्रणाशिनीम् ।। १७ ।।

स तथा विद्यया रेजे पक्षीशो जनवर्जिते ।
परमेश्वरपादाब्जं ध्यायन्मन्त्रं समभ्यसत् ।। १८ ।।

मुक्तमेघ इवादित्यो विराजति[3] यथा तथा ।
पक्षीशो मन्त्रमाहात्म्यात्तदा रेजे मुदाहृतः ।। १९ ।।

1. त्रितयं तथेति समञ्जसः पाठः । 2. वर्णाश्रमाः । 3. व्यराजत ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शिवलिङ्गार्चनविधिं चोक्तवान्काश्यपस्तदा ।
पूजाप्रभाववेत्तारं तं च कृत्वाण्डजेश्वरम् ।। २० ।।

काश्यपः प्राह [1]तत्पुत्रमेवमभ्यर्चयेति तम् ।। २१ ।।

भस्मत्रिपुण्ड्रपरिवर्जितफालदेशाद्
भूभारभूसुरवरादपि भासुराच्च ।
आचारतोऽपि सुविचारितावेदभाग-
सारार्थतः शिवपदार्चनहीनवृत्तेः ।। २२ ।।

रथ्यासु सर्वमतदग्धविदिग्ध भस्म-
गात्रैः सदा खरतरः खर एष वर्यः ।। २३ ।।

मूढः कामेषु बद्धो दृढतर भवजापारकारागृहीतो-
भ्रान्तः पुत्रकलत्रमित्रनिवहैर्वेदोदितैर्बन्धनैः ।
बद्धो बुद्धतरोऽपि पाशनिकरैः सर्वेषणाभिश्चिरं
ईशानार्चनवर्जनाधममतिः शम्भोः प्रसादोज्झितः[2] ।। २४ ।।

किं चितत्रमर्णमधगर्णगभीरनीरं
घोरभ्रमार्णवमिदं परिपूर्णकाम ।
तूर्णं सदाभ्यर्णहृदं सदा मां
सन्तारय स्वकरुणान्तरकर्णधार ।।

दिव्यश्रीशिपिविष्टचारुचरणाम्भोजप्रभावाद्भवे
भावो दनम्परम्परासु न भवेच्छ्रीशैवलिङ्गार्चकाः ।
मायाभावमाप्य भावजनितो भावो भवनीपति-
ध्यानानन्दसमुद्रमग्नहृदयो भेदप्रभावोज्झितः ।

।। इति श्रीशिवरहस्ये अष्टमांशे अष्टादशोऽध्यायः ।।

1. स चासौ पुत्रश्चेति अन्वयः । 2. समस्तपदत्वेन प्रयोगः युक्तः इति भाति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। एकोनविंशोऽध्यायः ।।

काश्यप उवाच

कृतनित्यक्रियः प्रातः समभ्युक्ष्याथवारिणा ।
नदीतीरे शिवागारे बिल्वमूलेऽपि वा द्विज ।। १ ।।

भस्माभ्यक्ततनुर्नित्यं त्रिपुण्ड्रमपि धारयन् ।
अग्निरित्यादिभिर्मन्त्रैः सर्वाङ्गं परिमृज्य वै ।। २ ।।

भस्मना पादपर्यन्तं श्रौतेन निरजेन च ।
त्रियायुषस्त्रिपुण्ड्राङ्कः कुशासन उदङ्मुखः ।। ३ ।।

प्राङ्मुखो वा सदा देवे मुखे तत्पूर्वमेव वा ।
सद्योजातमुखे वापि धृतरुद्राक्षमालिकः ।। ४ ।।

कण्ठे कर्णेगलेऽशेषवक्षोबाहुशिरस्वपि ।
पञ्चाक्षरमिदं मन्त्रं सप्तवारं जपेद्द्विज ।। ५ ।।

सहस्रं वा तदर्धं वा शतमष्टोत्तरं तु वा ।
उमासहायं देवेशं ध्यात्वा नासाग्रलोचनः ।। ६ ।।

हृत्पद्मसद्मगं देवं त्रिणेत्रं चन्द्रशेखरम् ।
सर्वाभरणसंयुक्तं फुल्लपञ्चमुखाम्बुजम् ।। ७ ।।

त्रिपुण्ड्रेनोज्ज्वलत्फालं कुपाशाहि त्रिशूलभृत् (?) ।
वृत्तबाहुं च निर्मृष्टप्रभाभरणशोभितम् ।। ८ ।।

सर्वाङ्गसुन्दरीं देवीं चन्द्रार्धमकुटोज्ज्वलाम् ।
नासाभरणशोभाढ्यां रत्नाभरणभासुराम् ।। ९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ताटङ्कद्वयसंशोभिमहेन्दुसदृशाननाम् ।
महागन्धजकस्तूरी पाटीरद्रवलेपिताम् ।। १० ।।

चम्पकैर्मल्लिकाजाजिमालतीसरभूषिताम् ।
ताम्बूलरागसंशोभि बिम्बाधरमनोहराम् ।। ११ ।।

हस्तद्वयाग्रसंशोभिकिङ्किणीनूपुरोज्ज्वलाम् ।
फुल्लहेलकहस्ताग्रां हरवामाङ्कगां सदा ।। १२ ।।

पार्श्वद्वये षडास्येन गजास्येन च शोभिताम् ।
ध्यायेदेवं महादेवं साम्बं चारुत्रिलोचनाम् ।। १३ ।।

शुद्धस्फटिकसङ्काशं नीलकण्ठं शिवां तथा ।
महामरतकीगर्भसच्छायां चारुहासिनीम् ।। १४ ।।

एवं ध्यात्वा चिरं देवं लिङ्गे चावाह्य तं शिवम् ।
पाद्यार्घ्यचमनैः पुष्पगन्धाम्बुपरिपूरितैः ।। १५ ।।

पत्रैः पञ्चाक्षरावृत्त्या मुद्रया दर्शितैस्तथा ।
आवाह्य स्थाप्य पीठे तं लिङ्गं स्फटिकधातुजम् ।। १६ ।।

बाणं वा सर्वभूतं च चरं वा स्थावरं तु वा ।
पञ्चाक्षरेण तन्मौलौ पुष्पं दद्याच्च भक्तितः ।। १७ ।।

स कूर्चं पादमूले तु निधाय स्थापयेच्छिवम् ।
पाद्यार्घ्याचमनं दत्त्वा मधुपर्कादि दापयेत् ।। १८ ।।

क्षीराभिषेकं प्रथमं ततो दधि घृतं मधु ।
सितां च नारिकेलोद कदलीफलजालकम् ।। १९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पनसाम्ररसं चापि ततो लिकुचजं रसम् ।
इक्षुसारं च गन्धोदं रत्नस्वर्णोद्भवं जलम् ।। २० ।।

अन्नाभिषेकं च ततो नीरै रुद्राभिषेचनम् ।
पाद्याचमनदानं च तत उद्वास्य[1] पूजयेत् ।। २१ ।।

पीठे लिङ्गं च संश्ताप्य वस्त्रयज्ञोपवीतकम् ।
भस्मनात्र्यम्बकेनैव पूजयेदिन्दुशेखरम् ।। २२ ।।

गन्धाक्षतांस्ततो दद्यात् स्वर्णाकल्पं यथारुचि ।
निधनेत्यादिभिर्मन्त्रैर्भवाद्यैर्बिल्वपत्रकैः ।। २३ ।।

अन्यैर्वा विविधैः पुष्पैर्ग्रामारण्योद्भवैरपि ।
तत्तत्कालभवैरेव पूजयित्वा महेश्वरम् ।। २४ ।।

धूपं दीपं ततो दत्वा नैवेद्यं चापि दापयेत् ।
ताम्बूलं च ततो दद्यात् ततो नीराजनं द्विज ।। २५ ।।

छत्रं च चामरादर्शं ततो तौर्यत्रिकक्रमम् ।
प्रदक्षिणां नमस्कारं रुद्रसूक्तेन कारयेत् ।। २६ ।।

ततस्तन्त्रैश्च वेदोक्तैर्विविधैरपि शङ्करम् ।
स्तोत्रेणानेन पतग संस्तुवीत महेश्वरम् ।। २७ ।।

नमो नमस्ते शशिचूड गङ्गा-
धराव्ययापारगरादिधारिन् ।
श्रीव्योमकेशाय दयार्णवाय
संसारवैद्याय नमो नमस्ते ।। २८

1. आभिषेचनिकात्पीठात्पीठान्तरं नीत्वेत्यर्थेऽयं प्रयोगः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नमो नमो देव दयाम्बुधे हर
मारा‌ङ्गसंहारक कालशत्रो ।
विश्वेश्वरापारदयानिधान
पाहीश श्रीशङ्कर रक्ष मां सदा ।। २९ ।।

भगाक्षिहर शङ्कर त्रिदशनाथ पाह्यब्जज-
प्रकाशवरमौलिधृक्प्रमथनाथ विश्वाधिक ।
गजान्तकमहाहव त्रिपुरघोरसंहारक
प्रसिद्धचरिताधुना मधुहराक्षिपूज्याङ्घ्रिक ।। ३० ।।

देव वेदनिगमान्तवेद्य
हृत्तापपापविनिवारक शम्भो ।
कालकाल करुणाकर शम्भो
पाहि मामखिलदुःखसमूहात् ।। ३१ ।।

स्तुत्वैवं शिवमिष्टदानकरुणापाङ्गं च लिङ्गस्थितं
सम्पूज्य प्रमथाधिनाथमगजाकान्तं स मुक्तिं लभेत् ।
कामानप्यमितानवाप्य स मुदा भुक्त्या सुखं शाङ्करः
पुष्पैश्चापि प्रदोषपर्वणि तथा पापैर्विमुक्तो भवेत् ।। ३२

।। इति श्रीशिवरहस्ये अष्टमांशे एकोनविंशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। विंशोऽध्यायः ।।

काश्यप उवाच

स काश्यपिर्नमश्चक्रे स्वपितुश्चरणाम्बुजम् ।
कद्रुद्रपूजासूक्तस्य काश्पस्य महात्मनः ।। १ ।।

तेन प्राप्तमहाविद्याप्रभावेणोद्यतः सदा ।
लब्धानुज्ञोऽथ गुरुणा वितत्य स्वभुजावुभौ ।। २ ।।

अगर्जद्बलवान्नादं तदा हरहरेति च ।
उत्पपाताथ गगने तरुणारुणनाथवत् ।। ३ ।।

मेरोर्मूर्ध्नि सरोनाथं मानसाख्यं तदाण्डजः ।
स मानससरःस्नानं चकाराशु हताशुभः ।। ४ ।।

मेरोरुपवने तत्र बिल्वमन्दारसंयुते ।
चम्पकाशोकसहिते माकन्दद्रुमसंयुते ।। ५ ।।

पारिजातवनोद्देशे कन्दमूलफलावृते ।
नानामृगाण्डजयुते केकिकोकिलनन्दिते ।। ६ ।।

निधाय तत्र लिङ्गं च पतगेश्वरनामकम् ।
अग्निरित्यादिभिर्मन्त्रैर्भस्माभ्यक्तमहाङ्गकः[1] ।। ७ ।।

धृतत्रिपुण्ड्ररुद्राक्षः पञ्चाक्षरजपादरः ।
रुद्रसूक्तजपासक्तः फलमूलैः सुमैस्तथा ।। ८ ।।

1. निजाङ्गकः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स मानसजलैः स्नाप्य प्रत्यहं पूजयेच्छिवम् ।
बिल्वमन्दारकुसुमैरसमैः कमलोत्पलैः ।। ९ ।।

निवेद्य फलमूलानि निराहारोऽचरत्तपः ।
वर्षं फलाशनः पक्षी वर्षं वायुजलाशनः ।। १० ।।

एवं द्वादशवर्षाणि तपसा विनतासुतः ।
(शिवमाराधयामास मनसा वचसा धिया ।)
कालेन कालकालस्य पूजया हृज्जयेन च ।। ११ ।।

तल्लिङ्गमध्यादीशानस्तस्मै प्रादुरभूच्छिवः ।
गङ्गाचन्द्रकलामौलिकपर्दविलसच्छिराः ।। १२ ।।

उमया सहितो नित्यं नीलकण्ठस्त्रिलोचनः ।
महावृषं समारुह्य नन्दिभृङ्गिगणावृतः ।। १३ ।।

तं दृष्ट्वा गरुडं तत्र महापशुपतिः स्वयम् ।
तपसा कर्शितं तत्र प्राह देवो वृषध्वजः ।। १४ ।।

नितरां परिखिन्नोऽसि तपसा पतगेश्वर ।
कस्ते कामो वद क्षिप्रं तं ते सम्पूरयाम्यहम् ।। १५ ।।

इति शम्भोर्वचः श्रुत्वा प्रणम्याण्डजराट्शिवम् ।
भक्त्याश्रुपुलको देवं मौलावञ्जलिमावहन् ।। १६ ।।

तुष्टाव शिपिविष्टं तमष्टमूर्तिं कृपाकरम् ।। १७ ।।

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

देव देव सकलामरवन्द्य
विश्वनाथ शशिचूड महेश ।
व्योमकेश जितपञ्चशरेश
शूलमूलकर दारितकाल ।।

मारमार हरिसायक शम्भो
कालकण्ठ करुणाकर धीर ।
घोरपातकभयादिहरेश
पाहि मां वरदयाघनसार ।। १९ ।।

क्षयद्वीरं वीरं गरधरमुमाकान्तमधुना
शरण्यं मौलीन्दुद्युति विजितदिग्वक्त्रतमसम् ।
महागोद्यर्चमकृत(?) पटसटाशोभिनृहरि-
स्फुरद्वक्षोहारिप्रखरनखरोद्योतितनखम् ।। २० ।।

प्रपद्ये देव त्वां श्रुतिवरशिरश्चारुपटली-
वलीढं ते पादं सकलसुरमौलिद्युतपदम् ।
अनाथानां नाथं सकलजगतामेकशरणं
शरण्यं त्वां शम्भुं भवहरणपादं कलयतः ।। २१ ।।

यथा चेतो नित्यं न भजति तथा प्राकृत सुरान्
हरिब्रह्मामर्त्यान्त्सवरुणमरुत्वादिकगुणान् ।
भवं भावापन्नं श्रुतिवरशिरोवेद्यचरितं
तवेशानं कस्ते प्रचरति नरः स्तव्यमधुना ।। २२ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मदीयोऽयं मन्तुः सहतु च भवानेव नमसा
यतो वेदे वेद्यो भवसि सहमानस्त्वमधुना ।
तथाप्येतद्भक्त्या त्वयि गदितमेतद्विजतु मे
वचः पथ्यं स्वास्थ्यं क्षमसि मयि तिर्यक्त्वदयया ।।

गरुडोद्गीतमेतद्वै स्तव्यः श्रुत्वा प्रदर्षितः ।
उवाच वरदोऽस्मीति वरं वृणु यथामति ।। २४ ।।

तवानयाण्डज श्रुत्या नितरां तुष्टमानसः ।
मद्वरेण च ते कामो भविष्यति न चान्यथा ।। २५ ।।

इति श्रुत्वा वचः शम्भोः प्राञ्जलिः प्राह चाण्डजः ।
प्राज्ञां बलं च विजयं ममताहरणाय मे ।। २६ ।।

मातुर्दास्यविमोक्षं च सर्पकौटिल्यजं हि मे ।
तव प्रसादतः शम्भो भविष्यत्वद्य[1] मा चिरम् ।। २७ ।।

मेरुमूर्ध्नि महादेव मत्कृते पतगेश्वरे[2] ।
अस्मिन्त्सन्निहितो लिङ्गे भव त्वं सर्वदा शिव ।। २८ ।।

इति तद्वचसा सर्वं तथास्त्वित्यवदद्धरः ।
ववृषुः कुसुमासारं देवा मूध्र्न्यण्डजेशितुः ।। २९ ।।

प्रावादयंस्ते वाद्यानि ननृतुस्ता वराप्सराः[3] ।
रम्भोर्वशीमेनकाद्या महेशस्यैव सन्निधौ ।। ३० ।।

1. अनीदृशोऽयं प्रयोगः । भवतादद्यमाचिरमिति पाठः सङ्गतो भाति ।
2. तन्नामके लिङ्गे । सकारान्तस्य अकारात्मतया प्रयोगः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ततः पतगराट् तदा पुरहराङ्घ्रिसम्पूजना-
द्बभूव बलगर्वितः फणिवरोरुमालाधरः ।
वितत्य निजपक्षतिं श्रयितवान्नभो नागहा
प्रकीर्णवरशैलहृत्पुरुफणीन्द्रवित्रासनः ।। ३१ ।।

हरोऽपि विजिहीर्षया गिरिजया समालिङ्गितो
मरुद्गणगणावृतः फणिगणोरुमालागणः ।
कृतोडुगणपोल्लसद्वरशिखण्डकोटिप्रभा-
विराजितकपर्दको वृषवराधिरूढो ययौ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे गरुडस्य ईश्वरप्रसादो नाम विंशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। एकविंशोऽध्यायः ।।

स्कन्द उवाच

तरुणः करुणामूर्तेः कृपया ह्यरुणानुजः ।
वरुणालयतः सर्पानुज्जहार महेन्द्रहा ।। १ ।।

योद्धुं ययौ देवलोकं पक्षावुत्क्षिप्य वेगतः ।
अट्टहासेन घोरेण कम्पयन्नमरावतीम् ।। २ ।।

ततो देवा भयापन्नाः सर्वे चापि सकिङ्कराः[1] ।।
विद्याधराश्च गन्धर्वाः सुपर्वाणो महौजसः ।। ३ ।।

किमेतदिति मन्वानाः समुत्तस्थुरुदायुधाः ।
अमृतं यत्र निक्षिप्तं गुप्तमुत्तमधन्विभिः ।। ४ ।।

देवैः किन्नरगन्धर्वैरुरगैरण्डजेश्वरः ।
प्रचण्डचण्डदण्डेन पक्षकाण्डेन भूयसा ।। ५ ।।

मार्ताण्डसारथेर्भ्राताऽखण्डयच्चण्डविक्रमः ।
कांश्चित्पक्षप्रहोरण ह्यतुलामलविक्रमः ।। ६ ।।

कलशं पूर्णमादाय ह्यमृतस्य तदाण्डजः ।
उज्जहारामृतं मध्यं मध्यन्दिनकरो यथा ।। ७ ।।

स मातुर्निकटे गत्वा नत्वा दत्वाऽमृतं तदा ।
मातरं मोचयामास दास्यभावात्स्वभावतः ।। ८ ।।

1. सकिन्नरा इति पाठः युक्तो भाति ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कद्रुपुत्रान् तदा युद्धे योधयामास वै खगः ।
आशीविषांस्तदा सर्पान्निर्वीर्यानकरोत्तदा ।। ९ ।।

तत्फणामणिमालाभिः शोभितः पतगेश्वरः ।
द्रावयामास तान् सर्वान् काद्रवेयांस्तदा खगः ।। १० ।।

तां मातरं सुपर्णीं च सान्त्वयन्नतिवेगतः ।
मेरोर्मूर्ध्नि तदा गत्वा प्रत्यहं वै तदाण्डजः ।। ११ ।।

पतगेश्वरमभ्यर्च्य बिल्वपत्रैश्च पङ्कजैः ।
समायाति गृहं मातुर्भक्तो नित्यं महेशितुः ।। १२ ।।

तदामृतं गतं दृष्ट्वा देवाः सर्वे सवासवाः ।
गन्धर्वाः किन्नरा यक्षा विद्याधरमहोरगाः ।। १३ ।।

बलप्रमथनार्चातो बलवन्तं च पक्षिणम् ।
मेनिरे विस्मयोपेता विष्णुं गत्वा तदाब्रुवन् ।। १४ ।।

उदन्तं तत्कथां सर्वे देवास्तत्र सवासवाः ।

देवाः (ऊचुः)

श्रृणु विष्णो भयं प्राप्तं देवानां गरुडात्सदा ।। १५ ।।

अमृतं यत्पुरा दत्तं समुद्रमथनोद्भवम् ।
पीतावशेषं देवैश्च रक्षितं तद्गृहे सदा ।। १६ ।।

तदुज्जहार बलवानमरारिः स पक्षिराट् ।
अमुञ्चन्मातरं स्वस्य दास्यभावादपि ध्रुवम् ।। १७ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कश्यपस्योपदेशेन शिवपूजाप्रभावतः ।
हिनस्ति देवान्गन्धर्वान्काद्रवेयानपि द्विज ।। १८ ।।

हीनामृतान्हरे देवान्मृतानित्युपधारय ।
निःश्रीकं विष्टपं सर्वं बहुकष्टसमावृतम् ।। १९ ।।

न भ्राजते यथापूर्वं तस्योपायं वदस्व नः ।
इत्युक्तोऽमरपूर्वजैः स च हरिः स्मेरान्तरङ्गस्तदा ।। २०

देवानाह तदाऽभयेन भगवान्भक्तं खगं तं तदा ।
ओजस्तेजयुतं शिवार्चनमहाप्राभाव्य जातं प्रभुं ।।
जेतारं त्वपराजितं रणगणे मेने तदा तं हरिः ।।

।। इति श्रीशिवरहस्ये अष्टमांशे एकविंशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। द्वाविंशोऽध्यायः ।।

स्कन्दः (उवाच)

ततो विष्णुः सुरानाह भीतांस्तान्गारुडात्तदा ।
मनसा चिन्तयन्नर्थं . . . . धृतव्रतः ।। १ ।।

विष्णुः (उवाच)

श्रृणुध्वममराः सर्वे जयहेतुं गरुत्मतः ।
न स शक्यो बलैर्जेतुं सर्वैरपि सुरासुरैः ।। २ ।।

मया च ब्रह्मणा चैव कश्यपस्यात्मजः पुरा ।
किञ्च शर्वार्चनबलादखर्वं गर्वमाश्रितः ।। ३ ।।

तेन सम्पीडयत्येव जगत्सारुरमानुषम् ।
आशीविषानपि मुदा निर्विषानकरोद्बली ।। ४ ।।

स बली शम्भुभक्तश्च भस्मरुद्राक्षधृक्सदा ।
पतगेश्वरमभ्यर्च्य मेरुमौलौ कृताश्रयः ।। ५ ।।

श्रमहीनः सदा शम्भोः पादसंश्रयतः खगः ।
क्षयद्वीर पदार्चातो वीरसूर्यः खगेश्वरः ।। ६ ।।

साम्नैवाभिप्रपन्नस्य सर्वं भवति हृद्गतम् ।
शाम्भवेषु न मे धाष्टर्यं उपेक्षा वापि विक्रमः ।। ७ ।।

शिवभक्ता महाघोराः पराक्रमयुताः सदा ।
अघोरपादसंसक्ता असुरा भूसुरास्तथा ।। ८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पुरा दक्षाध्वरे सर्वे वीरभद्रेण शिक्षिताः ।
अहं देवेश्वरस्त्वं च भगाद्या देवतागणाः ।। ९ ।।

सागरोद्भवतो घोराद्गराद्दग्धोस्मि सर्वदा ।
करुणाकरदेवेन तारिता गरभक्षणात् ।। १० ।।

मत्स्यकूर्मवराहं च नारसिह्मतनुर्हरः ।
शिक्षयामास मे पूर्वं वीर्योद्रेकेण सर्पहा ।। ११ ।।

यस्य भक्तैर्द्विजैश्चाहं सर्वदापि निराकृतः ।
शापितोऽहं च भृगुणा मानुषीं योनिमाश्रितः ।। १२ ।।

रावणेन रणे पूर्वं निर्विण्णोऽस्मि तदा सुराः ।
दशजन्मस्वपि सदा ह्यसुरैः पीडितोऽस्म्यहम् ।। १३ ।।

यदा यदा मां गर्वाढ्यं दृष्ट्वा देवः पिनाकधृक् ।
भवतश्च सदा दृप्तान् दृष्ट्वा वै स महेश्वरः ।। १४ ।।

उत्पाद्यैवासुरश्रेष्ठान् मुरजम्भादिवृत्रकान् ।
नमुचिप्रमुखांश्चापि तथान्यांश्च युगे युगे ।। १५ ।।

हिरण्याक्षादिभिर्युद्धे अस्मान्मोहयति स्वरः ।
तांश्च दृप्तानथ ज्ञात्वा अस्माभिर्विनिहन्ति तान् ।। १६ ।।

अस्माभिरपि येऽशक्यास्तान्युद्धे हन्त्यसौ स्वयम् ।
त्रिपुरान्धककामादिकालकालः कृपानिधिः ।। १७ ।।

दधीचिनापि मुनिना निर्जितोऽस्मि रणाजिरे ।
भवोद्भवस्य चरितं दृष्टं पूर्वं सुरासुराः ।। १८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तस्मात्खगेश्वरजये तं प्रसाद्य जयो भवेत् ।
इत्युक्त्वा स सुरैः सार्धं ययौ यत्र खगेश्वरः ।। १९ ।।

मेरुमूर्ध्नि कृतावासमण्डजं प्राह माधवः ।

विष्णुः (उवाच)

धन्योऽसि कृतकृत्योऽसि मान्योऽसि पतगेश्वर ।। २० ।।

न त्वया सदृशं भूतं लोके दृष्टं मया सुरैः ।
शिपिविष्टपदार्चातः सर्वेषां कष्टनाशकः ।। २१ ।।

सुसन्तुष्टो हि निष्ठावाञ्ज्येष्ठलिङ्गार्चनात्सदा ।
बलप्रमथनार्चातो बलवांस्त्वं खगेश्वर ।। २२ ।।

क्षयद्वीरपदार्चातो वीरोऽस्यण्डजसत्तम ।
कस्ते प्रभावं च गुणं शक्तो वक्तुं सुरेष्वपि ।। २३ ।।

अशक्ता एव सर्वेऽपि तुल्यः[1] शक्तिधरेण हि ।
मत्तो वृणुष्व कामं ते तदद्यैव प्रपूरये ।। २४ ।।

सूतः (उवाच)

इति विष्णुवचः श्रुत्वा प्रहस्य गरुडोऽवदत् ।
मृडार्चनरतो विष्णुमिन्द्रादीनपि तत्र वै ।। २५ ।।

गरुडः (उवाच)

सर्वं जानामि ते चित्तं सुराणां कार्यसाधक ।
त्र्यक्षार्चनप्रभावेण त्वया चक्रमिदं हरे ।। २६ ।।

1. त्वत्प्रभावस्य गुणस्य च कथने सर्वेऽपि सुरा अशक्ता भवन्ति । त्वं तु शक्तिधरेण कुमारदेवेन तुल्योऽसि ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

लब्धं तेनैव विजयो भविष्यति सुरेष्वपि ।
वैकुण्ठमपि सम्प्राप्तं त्वया शर्वपदाश्रयात् ।। २७ ।।

देवानहं सदा जाने कान्दिशीकान्हि मत्पुरा[1] ।
पुरा दक्षमखे यूयं वीरभद्रेण शिक्षिताः ।। २८ ।।

भ्रष्टा नष्टौजसः सर्वे शिवद्रोहेण वै तदा ।
गरज्वालावलीदग्धतनुस्त्वं भासि काष्ठवत् ।। २९ ।।

त्वं कथं वरदो मेऽद्य किं नूनं मम वै हरे ।
अहं दास्ये वृणु वरं यथेष्टं वरयाधुना ।। ३० ।।

अचलातुल राजकन्यका-
कुचलीलाललितोरुचारुवक्षसम् ।
श्रुति लोलाक्षमालभूतिभूषा(षं)-
विषमाक्षं भजति प्रदोषकाले ।। ३१ ।।

यः कालान्तकपूजनेन दिवसं निन्ये सकलातिगो
भूयान्नैव भवी स संसृतिभरेष्वाकण्ठलग्नोऽप्यसौ ।
दुःखेषु प्रसभं हि मज्जति न वै किं दुष्कृतैः शाङ्कराः
भद्राण्येव लभेत शङ्करकृपापीयूषधारारसैः ।। ३२ ।।

शतपथयजुषामथोर्ध्वगम्यं
यच्छ्रुतिसारं जपतामथ प्रदोषे ।
प्रमथपति पदाब्जसक्तचित्तो
भ्रमते नैव भवे[2] भवेषु सक्तः ।।

।। इति श्रीशिवरहस्ये अष्टमांशे द्वाविंशोऽध्यायः ।।

1. मत् = मत्तः मत्सकाशात् अपजयं प्राप्तान् देवान् अहं जाने ।
2. भवे सक्तचित्तः भवेषु जननमरणरूपसांसारिकावर्तेषु न भ्रमते इति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। त्रयोविंशोऽध्यायः ।।

मुनिः (उवाच)

इत्युक्तं तद्वचः श्रुत्वा तमाह सुरसत्तमैः ।
विष्णुस्तदाण्डजश्रेष्ठं काश्यपं मेरुमूर्धनि ।। १ ।।

श्रीविष्णुः (उवाच)

यदि देयो वरो मह्यं सत्यमद्य खगेश्वर ।
मातुर्दास्यापहरणे यन्नीतममृतं त्वया ।। २ ।।

तदद्य देहि देवानां अमृतास्तेन वै सुराः ।
हीनामृताः सुराः सर्वे मृता इत्यवधारय ।। ३ ।।

साहाय्यमासुरे युद्धे वाहनत्वेन मे कुरु ।
वरद्वयं मे देह्यद्य सत्यसन्धो भवान् खग ।। ४ ।।

सत्ये प्रतिष्ठिता लोका ऋतं सत्यं महेश्वरः ।
सत्येनादित्यबलिनः सत्येन ध्रियते मही ।। ५ ।।

नक्षत्राणामथोपस्थे सोमः सत्येन आहितः ।
इत्येषा बह्वृचा प्रोक्ता श्रुतिरेषा सनातनी ।। ६ ।।

तस्मात्सत्यपरो भूयाः पतगेशस्य सन्निधौ ।
तदा विष्णुवचः श्रुत्वा प्राहाण्डजकुलोद्भवः ।। ७ ।।

शर्वपादार्चनरतो मेरुपर्वतगध्यगः ।
सत्ये स्थितोऽहमेवाद्य सत्यभूतः शिवाश्रयात् ।। ८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आज्ञया देवदेवस्य यूयं सर्वे सुरासुराः ।
उदेति सविता नित्यं वायुर्वाति शिवाज्ञया ।। ९ ।।

चन्द्रोऽपि भगणैः सार्धं भ्रमन्तेऽहर्निशं ग्रहाः ।
शेषोऽशेषशिरोवृन्दैर्बिभर्तिपृथिवीमपि ।। १० ।।

सागरो गरकण्ठस्य शासनान्नोर्ध्वगो भवेत् ।
मुनयो मनवश्चैवाप्यनलो वहते हविः ।। ११ ।।

लोकालोकास्तथा सर्वे विष्णो सत्ये प्रतिष्ठिताः ।
ददाम्यद्य वरं तेऽद्य यथा सम्प्रार्थितं त्वया ।। १२ ।।

सुराणां सन्निधौ विष्णो किं पुनः शिवसन्निधौ ।
यः शम्भोः सन्निधौ शम्भौ सत्यं कृत्वा न पालयेत् ।। १३

स याति नरकं घोरं दारुणं देहसङ्क्षये ।
तस्मादवश्यं कर्तास्मि ददाम्यमृतमेव ते ।। १४ ।।

सुराणां दुःखजनकं न मे कार्यं हरे सदा ।
मातुर्दास्यापहरणे समानीतं मयाधुना ।। १५ ।।

किञ्चैकं वच्मि ते विष्णो सुराणामुपश्रृण्वताम् ।
सन्निधौ पतगेशस्य सत्यं वाच्मि हरेऽधुना ।। १६ ।।

यदा भस्मादिदिग्धाङ्गस्त्रिपुण्ड्रोज्वलचिह्नवान् ।
रुद्राक्षमालाभरणो यत्र युद्धे गमिष्यसि ।। १७ ।।

लिङ्गार्चकोऽसि नियतं बिल्वपत्रैरखण्डितैः ।
शिवनैवेद्यभोक्ता त्वं सदा शर्वपदाश्रयः ।। १८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सुरैरपीदृशैर्युक्तो यदा विष्णो गमिष्यसि ।
तदा ते विजयो विष्णो भविष्यति शिवार्चनात् ।। १९ ।।

शिवचिह्नाङ्कितः शत्रूञ्जेष्यत्येव न संशयः ।
भस्मरुद्राक्षहीनाङ्गान् परानाजौ हनिष्यति ।। २० ।।

तदा वहामि स्कन्धेन नान्यथा मम भाषितम् ।
किञ्च जाल्मोऽसि च भवान् त्यक्तभस्माक्षकः पुरा ।। २१

संशिक्षितोऽसि यज्ञेशेनैव देवाः पराजिताः ।
वीरभद्रेण हि पुरा तस्मात्सत्यं वदाधुना ।। २२ ।।

इत्युक्तो गरुडेन शङ्करपदध्यानानुरक्तेन हि
विष्णुर्वाक्यमिदं जगाद रभसा हर्षाश्रुधारावृतः ।
देवानामुपश्रृण्वतां शिवपुरो दृष्ट्वाण्डजेशं तदा
प्राप्यात्रामृतमुत्तमं सुरकरे दत्त्वातिसन्तोषतः ।। २३ ।।

यः शाम्भवेन भवताजिषु सर्वदापि
जातोप्यभूतबलिना विजयो हि मेऽद्य ।
काङ्क्षेऽक्षताद्य हृदये खलु सत्यमिष्ट-
मेतत्त्वयोक्तमधुना प्रकारोमि पक्षीन् ।। २४ ।।

इत्युक्त्वा स जगाम देवसहितो भक्तिं च वीक्ष्याण्डजे
सन्तुष्टोऽथ खगोऽपि विष्णुमवहद्दैत्याजिमध्ये स्वयम् ।
रुद्राक्षामलभस्मसङ्गतमुमाकान्तार्चकं तं हरिं
पद्माक्षालकपूजितोत्तमहरं निष्ठावता चेतसा ।। २५ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे गरुडप्रसादो नाम त्रयोविंशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। चतुर्विंशोऽध्यायः ।।

स्कन्दः (उवाच)

गरुडोपद्रुताः सर्पाः काद्रवेया महाबलाः ।
नखतुण्डविनिर्भिन्ना गरुडेन हृतैजसः ।। १ ।।

पक्षविक्षिप्तघूर्णाक्षास्ते चक्षुःश्रवसां वराः ।
शेषोऽनन्तो वासुकिश्च कार्कोटकधनञ्जयौ ।। २ ।।

गुलिकः शङ्खपालश्च धृतराष्ट्रः पिलिप्पिलः ।
कम्बलाश्वतरौ बभ्रुस्तुहण्डो बलवर्धकः ।। ३ ।।

पनसो वारणो रेभ्यस्तक्षको भद्रकर्णकः ।
पवनाशोऽणिमाण्डव्यो गर्गोऽथ वसुषेणकः ।। ४ ।।

उदावसुः गृध्रहनुर्जातूकर्णोह्यः शिराः ।
कपोतरोमा स्तब्धाक्षश्चित्रघण्टो विदारणः ।। ५ ।।

इत्येते नागराजानः कद्रूतनुसमुद्भवाः ।
मात्रा सहैव ते सर्वे दुःखिता गरुडार्दिताः ।। ६ ।।

काश्यपं प्रणिपत्योचुः सर्पा दर्पविवर्जिताः ।
उच्छ्वसन्तः श्वासभारैर्दुःखशोकाकुलान्तराः ।। ७ ।।

प्रणताः स्मो मुनिश्रेष्ठ भार्यां पश्य कनीयसीम् ।
आयसी प्रतिमेवास्ति दुःखशोकजरातुरा ।। ८ ।।

गरुडेन निहतान् पुत्रान् शोचन्ती त्वां समागता ।
यत्कौटिल्यं पुरा मात्रा यदस्माभिः कृतं तदा ।। ९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्पापफलभोक्तारस्त्वत्सकाशमिहागताः ।
साऽथ कद्रूर्मुनेः पादौ नत्वाथ व्रीडिता तदा ।। १० ।।

प्राह भर्तारमीक्षन्ती निःश्वसन्ती च पन्नगी ।
सन्नगीरतिदृप्तापि गुप्ता कौटिल्यवर्जिता ।। ११ ।।

सापत्न्यक्रोधतोभर्त्रा पुत्रवात्सल्यमोहिता ।
गरुडेन हताः सर्पा मत्कौटिल्याग्निधर्षिताः ।। १२ ।।

हतशिष्टान्गुदप्राणान्गरुडाद्रक्ष मे सुतान् ।
दृढं पटुपदध्यानात्त्वं च गूढतपोऽधिकः ।। १३ ।।

मूढान्गूढपदान्विप्र मातरं प्रौढिवर्जिताम् ।
इति तस्या वचः श्रुत्वा काश्यपः प्राह तां तदा ।। १४ ।।

सान्त्वयन्त्स मुनिश्रेष्ठस्तदा तां सर्पमातरम् ।
मैवं वद विशालाक्षि का चिन्ता मयि संस्थिते ।। १५ ।।

जीवयिष्ये सुतांस्तेऽद्य गरुडेन हतान्पुनः ।
मा कौटिल्यं कुरुष्वाद्य सपत्नीं प्रति तादृशम् ।। १६ ।।

ये छद्म कुर्वते मूढास्तैः पश्चात्तप्यते भृशम् ।
सन्तप्ताः फलतस्तेऽद्य पुत्रा नष्टा हतौजसः ।। १७ ।।

इति तां सान्त्वयन्वाक्यैर्मृतान्सञ्जीवयन्मुनिः ।
शिवार्चन प्रभावेण पद्मजातसुतो मुनिः ।। १८ ।।

तानाहूय सुतांस्तत्र प्राहार्थवदिदं वचः ।
ईशमाराधय केदारे स्वसुतैः सह सुव्रते ।। १९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ईश्वरस्य प्रसादेन केदारस्यार्चनेन च ।
महेशाज्ञावशा कद्रु स्वसुतैः सह संवस ।। २० ।।

पातालहरिकेशाख्यं लिङ्गं सम्पूजयानघे ।
पुत्रैराराधयेशानं तेन त्वं सौख्यभागिनी ।। २१ ।।

भोगिभिर्भोगनिलयं पातालं सर्वसौख्यदम् ।
त्रिविष्टपादपि सदा शिपिविष्टाश्रया सदा ।। २२ ।।

तल्लिङ्गमहिमानं ते समासात्प्रब्रवीम्यहम् ।
गङ्गाजटाजूटमौलेरिन्दुचूडस्यचेशितुः ।। २३ ।।

हाटकेशाख्यलिङ्गस्य महिमां मे श्रृणु ध्रुवम् ।। २४ ।।

तल्लिङ्गप्रभया सुदीपितमहो पाताललोकं सदा
नागानां विलसत्फणामणिगणज्योत्स्नोरुधारातताः ।
नो चन्द्रार्कसुविद्युदुज्ज्वलमहावह्निप्रभाभादिकाः
नोषा नो भगणाः सदैव न दिवारात्रं महेशाश्रयात् ।। २५ ।।

बृन्दारबृन्दा अपि चन्द्रमौलि-
पादारविन्दभजनाय मुदा प्रयान्ति।
नागैर्नगोपममहोरुशरीरशीर्षै-
र्नागारिवाहसहिताः परिपूज्य यान्ति ।। २६ ।।

तत्पातालतलेऽपि हाटकमहालिङ्गं सदेवार्चयन्
नागैर्नागवराः स्वकीयसुमहाशुण्डोरुकाण्डोत्थितैः ।
धारासार सुपुष्करोद्धृतलसद्बिल्वीदलैः कोमलैः
ते चाष्टौ निवसन्ति भूधरवराः कैलाससानुप्रभाः ।। २७ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पाताले तालकेतु प्रभृतिबलिराः शत्रुवित्रासना ये
देवा अप्यमरावतीं परिविहायात्रैव सम्मोदिताः ।
विप्रेन्द्राः सुरसिद्धदैत्यनिकरा यूयं च नागोत्तमाः ।
शार्वं लिङ्गमुमातेः प्रियतमं श्रीहाटकेशाभिधम् ।। २८ ।।

कष्टं वीक्ष्य त्रिविष्टपं श्रुतिशिरोनिष्ठां हि सम्प्राप्य ते
धन्यास्ते शिपिविष्ट निष्ठमनसा सम्पूज्यन्त्वादरात् ।
जूटाहिद्युतिकोटिकूटघटनोत्तुङ्गोत्तमाङ्गोल्लस-
च्चन्द्रांशुस्फुटदुत्पलारुणरजः स्वः सिन्धुमौलिं हरम् ।।

लीलापाङ्गस्फुलिङ्गसङ्गतमहानङ्गाङ्गमातङ्ग हृ-
त्तल्लिङ्गोत्तममध्यसङ्गतभुमादेहार्धलिङ्गं हरम् ।
बालेन्दुद्युति जूटिताखिलजटत्कोटीरपाटीरकं
घोटीवेदवधूटिकार्धविलसद्गात्रं निटालेक्षणम् ।। ३० ।।

पाटीरागरुचन्द्रचन्दनवरैरालिङ्ग्य काकोदरा
स्वैर्दारैरतिसुन्दरैः सुमनसां भारैश्च तद्धाटकम् ।
लिङ्गं तत्परिपूजयन्ति नियता वीरैः कुमारैर्युताः ।। ३१ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे पाताले हाटकेशप्रभावो नाम
चतुर्विंशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। पञ्चविंशोऽध्यायः ।।

श्रीकाश्यप उवाच

उपायमेकं वक्ष्यामि पुत्रैः साकं श्रृणुष्व मे ।
यस्याराधनमात्रेण सर्पास्ते सुखिनः सुताः ।। १ ।।

जरामरणनिर्मुक्ता गरुडाद्भयभीतितः ।
मुक्तास्ते पन्नगश्रेष्ठे यन्नागा निवसन्तु ते ।। २ ।।

मौलौ हिमवतः सुभ्रु नानामुनिवृतस्य वै ।
निवसन्तु सदा ह्रष्टाः शिपिविष्टार्चने रताः ।। ३ ।।

वरकाकोदराः सर्वे केदारेशसमर्चकाः ।
कुमारदारसहिता मारमारार्चने रताः ।। ४ ।।

असारसंसारमिदं तरन्तु च सुनिर्भयाः ।
सापत्न्यदुःखसन्तप्तो गरुडो बलवत्तरः ।। ५ ।।

दृढं मृडार्चनरतः स्वमौग्ध्यपरिवर्जितः ।
अमृतं योऽहरत्पूर्वं सुरान्विद्राव्य निर्भयः ।। ६ ।।

हरिणा प्रार्थितो देवैर्वाहनं त्वण्डजेश्वरः ।
प्रादाद्वरं स हरये वहामीति सुतो मम ।। ७ ।।

अशाङ्करं हरिं दृष्ट्वा पातयत्यम्बुधौ हरिम् ।
स्वस्कन्धतोऽद्य गरुडो मृडपादार्चने रतः ।। ८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हनिष्यत्येव ते पुत्रान् सोऽपि पुत्रो ममाधुना ।
पतत्रिनाथो बलवान् त्रिणेत्रपदपूजया ॥ ९ ॥

उभयोः सन्धिकरणं जनिवैरान्न संभवेत् ।
तस्मात्सर्पा महादेवं कन्दर्पोद्दर्पगर्वहम् ॥ १० ॥

व्रजन्तु शरणं साम्बं शरण्यमभयप्रदम् ।
आराध्य देवदेवेशं केदारेशं वसाधुना ॥ ११ ॥

शिवचिह्नाङ्किता त्वं च भव सुभ्र सुतैः सह ।
भस्मरुद्राक्षसम्पन्ना शिवलिङ्गार्चने रता ॥ १२ ॥

त्रिपुण्ड्रधारिणः सर्वे सर्पाः पञ्चाक्षरादराः ।
रुद्राध्यायानुकृत्यैव काद्रवेया वसन्त्यपि ॥ १३ ॥

केदारेशार्चनेनैव सिध्यन्त्येव मनोरथाः ।
सुरासुराश्च मुनयो यूयं केदारपूजया ॥ १४ ॥

बभूवुर्बलिनः सर्वे तस्मात्त्वं शरणं व्रज ।
पुत्रैः साकं व्रजसुखं शिवार्चनरता भव ॥ १५ ॥

शाम्भवं लाञ्छनं दृष्ट्वा गरुडो न हनिष्यति ।
ये शाम्भद्रोहकृतस्ते वै निरयगामिनः ॥ १६ ॥

तस्मात्पतगराट् सर्पान्न वै हिंस्यात्सुखं व्रज ।
शिवोऽपि ते प्रसन्नः स्यात्केदारेशस्य पूजया ॥ १७ ॥

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पुत्राणां तव देवोऽपि त्राणं भक्त्या करिष्यति ।
त्रिपुण्ड्रमौलयः सर्वे कुण्डलीशा भवन्त्वपि ।। १८ ।।

रुद्राक्षभूषणाः सर्वे ते चुक्षुःश्रवसां वराः ।
भवन्तु भवपादार्चां भावैः कुर्वन्तु नान्यथा ।। १९ ।।

पादकञ्चुकनिर्मुक्ता त्यक्त्वा स्वैः कञ्चुकैः सह ।
कुलिञ्चपदपूजातो वञ्चनावर्जिताः सदा ।। २० ।।

रुद्राक्षधारणाच्चापि तथा पञ्चाक्षरी जपात् ।
भस्मत्रिपुण्ड्रकरणात् भवः प्रीतो भविष्यति ।। २१ ।।

रुद्राध्यायजपेनेशस्तथा बिल्वार्चनेन च ।
केदारवासाच्च सदा काकोदरसुखप्रदः ।। २२ ।।

प्रदिशत्येव देवेशः सर्पाणां स्थानमुत्तमम् ।
सर्पाणां प्रीतितः शुम्भुः स्वाङ्गभूषां करिष्यति । २३ ।।

न केदारसमं लिङ्गं भव्यं हि जगतां त्रये ।
प्रसादजनकं साक्षात्पूजितं भुक्तिमुक्तिदम् ।। २४ ।।

मया पद्मासनाज्ञातः पूजितं सर्वकामदम् ।
तत्पूजया सृष्टिरेषा मत्तो जाता सुरासुरैः ।। २५ ।।

तस्मात्पूजय यत्नेन कद्रु त्वं स्वसुतैः सह ।। २६ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

काश्यपः (उवाच)

अम्भोजसम्भवभवा मनवः सुराश्च
कुम्भोद्भवादिमुनयो दितिनन्दना ये ।
अम्भोधितल्पकगतो हरिरेतदेव
लिङ्गं सदम्बुजवरैः परिपूज्य बिल्वैः ।। २७ ।।

तुष्टोऽप्यशेषसुविशेषमहाहिशेष-
भूषाविशेषभसितः समयूखकोटि-
सङ्काशलिङ्गमधुना परिपूजयस्व ।। २८ ।।

काश्यपः (उवाच)

इत्युक्तं मुनिवचनं निशम्य कद्रूः
कद्रुद्रार्चनसाधनाय पुत्रयुक्ता ।
केदारं मुदितमना ययौ तदानीं
नत्वा तं मुनिवरमीशपादभक्तम् ।। २९ ।।

सर्पास्तेऽपि ततो निशम्य वाक्यं
भस्माक्षादिविभूषिताः सहैव मात्रा ।
निर्जग्मुर्हिमशिखराश्रयं तदानीं
क्षेत्रं तत् त्रिदशपतेर्महेशितुः प्रियं वै ।। ३० ।।

कुमुदाम्बुजमित्रवह्निनेत्र[1]-
प्रियलिङ्गार्चनतोरगाः कृतार्थाः ।

1. चन्द्रार्कवह्निनयनस्य शिवस्य प्रियं यल्लिङ्गं तदर्चनतः उरगाः कृतार्थाः जाताः इति भावः । अर्चनतोरगाः इति पदप्रयोगोऽसाधुरेव ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्रुतिशेषविशेषदर्शने
मतिरीशानपदार्चनाद्भवेत् ।। ३१ ।।

उरगा अप्युरुगायभक्तिनिष्ठा
तुरगाराति[1]वहान्तकाब्जपादे ।
मुरमारहरामरेन्द्रवन्द्ये
करवीरेन्द्रकटत्वचोरुवासे ।। ३२ ।।

अरुणानुजभीतितो विहीना
वरतक्षकवासुकिद्विजिह्वाः ।
शरणारुणपादपद्मयुग्मे (युग्मं)
भजतां नास्ति भयं कदाचिदेव ।। ३३ ।।

वरुणालयपारणेन शम्भुं
करुणासागरमीश्वरार्चनेन ।
मरणादपहाय भीतिजातं
स्मरणेनेशितुरेव कारणेन हाराः ।। ३४ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे पञ्चविंशोऽध्यायः ।।

1. तुरगारातिः सैरिभः (महिषः) सः वहः (वाहः) यस्य तादृशस्य यमस्य अन्तंकरोति इति तुरगारातिवहान्तकः शिवः तस्य पादाब्जे भक्तिनि(ष्ठः) ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। षड्विंशोऽध्यायः ।।

स्कन्द उवाच

केदारेशं समाराध्य काकोदरवरास्तदा ।
भस्मरुद्राक्षसम्पन्नाः पञ्चाक्षरपरायणाः ।। १ ।।

रुद्राध्यायेनाभिषिच्य बिल्वैः सम्पूज्य भक्तितः ।
स्वफणामणिमाणिक्यैः सम्पूज्य परमेश्वरम् ।। २ ।।

नैवेद्यैर्धूपदीपैश्च तथा नीराजनैरपि ।
तुष्टुवस्तेऽपि भुजगा भुजङ्गाभरणं शिवम् ।। ३ ।।

नागा ऊचुः

पाह्यब्जमित्रनयनामलभूतिगात्र
रुद्र त्रिणेत्र गिरिराजसुताकलत्र ।
पात्रं विचित्रतरमेतदहो पवित्र-
सत्रातिरात्रमखतर्पित लोकयाशु ।। ४ ।।

श्रीव्योमकेश सकलेश महेश शम्भो
कोशावकाश शशिशेखर शङ्करेश ।
देवेश खण्डपरशो पशुपाशनाश
पाहीश मामकधिया तव पादभक्तान् ।। ५ ।।

तं भर्गसर्गकरणाव्यय दीनवर्गं
सन्तारयार्गलपदान्परिमोचयाशु ।
दूर्वादलार्चितपद त्रिदशारिगर्व-
निर्वापणार्णववसाम्बुजनेत्रपूज्य ।। ६ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्रीमन्मेरुशरासन त्रिभुवनाध्यक्षाध्वराध्यक्ष नो
वीक्षस्वाद्य दयाकटाक्षलहरीसंहारितापादिकान् ।
उक्षाधीश्वरकेतनेश्वर दयापात्र त्रिणेत्राधुना
कक्षाणां च पते सुदक्षमखहृत् तूर्णं प्रसादं कुरु ।। ७ ।।

भूभृद्राजकुमारिकाकुचतटीपाटीरपङ्काङ्कितं
रुद्राक्षप्रिय भस्मयुक्त निटिलज्वालोरु गङ्गाधर ।
वैयाघ्रत्वगलङ्कृताङ्गमसकृत्पश्येम चित्ते सदा
विश्वेशादिपदप्रदं हरिशरं सम्भावयामो हर ।। ८ ।।

नागानां च स्तवं श्रुत्वा केदारेशो महेश्वरः ।
तल्लिङ्गमध्याच्च तदा ह्याविरासीत्स्वयं हरः ।। ९ ।।

नागाजिनोत्तरासङ्गः शशाङ्ककृतशेखरः ।
उमया सहितो देवो नीलकण्ठस्त्रिलोचनः ।। १० ।।

गङ्गाधरः कपालाङ्कशूलज्वलनसत्करः ।
तं दृष्ट्वा देवदेवेशं सर्पाः कद्रूसमन्विताः ।। ११ ।।

प्रणम्य च महादेवं संस्तुवन्नीललोहितम् ।। १२ ।।

नागा ऊचुः

वेदार्व शर्व यमगर्वहराव शर्व-
कन्दर्पदर्पहर सर्पमहोरुहार ।
अग्न्यग्र भीम भव भर्ग सुसर्गवर्ग-
स्वर्गापवर्गद विभो तव भक्तिमार्गम् ।। १३ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दूर्वादलार्चनकृतां भवदीयलिङ्गे
सङ्गेऽपि शाङ्गनिवहाः किमुतापमार्गैः ।
बिल्वैश्च पङ्कजवरैः कनकैः कदम्बैः
पूज्येन्दुचूड कुलभूधरवास शम्भो ।। १४ ।।

विश्वा(धिकेश्वर)महेश्वर रामधीर
गौरीमनोहर हरात्यय मारमार ।
संसारभारपरिहारभव प्रसीद
श्रीशङ्कराव वरधुर्यधर प्रसीद ।। १५ ।।

सूतः (उवाच)

तत्स्तुत्या तोषितः शम्भुस्तानुवाचोरगेश्वरान् ।
प्रणतान्विनतान्त्सर्वाञ्छर्वो रुद्र उमापतिः ।। १६ ।।

श्रीमहादेवः (उवाच)

चक्षुःश्रवोत्तमा यूयं मद्भक्ता मत्परायणाः ।
भवत्स्तुत्यातिसन्तुष्टो भवतां कष्टनाशकः ।। १७ ।।

शिपिविष्टोऽहमधुना तुष्टोऽहं भवतां मुदे ।
वृणुध्वं काद्रवेया वै वरं मत्तोऽभिकाङ्क्षितम् ।। १८ ।।

इच्छाप्रपूरको नित्यं स्वेच्छानामस्मि साम्प्रतम् ।
निरिच्छानां हृदिस्थां च वाञ्छामच्छां ददाम्यहम् ।।

मच्छासनैकनिष्ठानां भस्मरुद्राक्षधारिणाम् ।

सूतः (उवाच)

सदाशिववचः श्रुत्वा नत्वा ते भुजगोत्तमाः ।। २० ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सह कद्‌र्वा प्रणम्येशं वव्रुर्वरमनुत्तमम् ।
सा च कद्रूर्महादेवं प्रणम्य परमेश्वरम् ।। २१ ।।

तुष्टावाष्टाकृतिं शम्भुं शिपिविष्टं कृपाकरम् ।। २२ ।।

स्कन्द उवाच

शम्भो विश्वमहेश शङ्करजटाजूटैक गङ्गाधर
स्फारावारस्फुलिङ्गनेत्रनिवहज्वालाविदग्धान्तक ।
शम्भो विश्वेश शम्भो शशिगिरितटिनीजूटकूटोज्ज्वलाङ्ग
ज्वालानेत्राब्जजातोत्तमवरशिरसांमालिकालङ्कृताङ्ग ।।

उक्षाङ्गापाङ्गसङ्ग स्फुरदुरुपदभूदिव्यमातङ्गभङ्ग
नागाङ्गाभङ्गगङ्गाजललवकुटिलालोलदिव्योत्तमाङ्ग ।
पाहीश प्रमथेश चारुकरुणामूर्तेऽरुणाद्रिस्थित
पारावारमहाघसागरतरीश्रीकर्णधार प्रभो ।। २४ ।।

पुत्रान्मे शरणागतान्करुणया ज्वालोरुनेत्र प्रभो
पाहीशान दयानिधान अरुणभ्रातुर्भयात्पीडितान् ।
चन्द्रापीड महेश ते चरणयोर्भक्तिप्रभाभावितान्
नास्त्यन्यत्तवपादयोः शशिकलामौले शरण्यं परम् ।। २५

त्वं मातासि पितासि सर्वजगतां तेन त्वमेवेश्वर-
स्त्वत्तो मे सुतवृन्दमेतदधुना प्राप्नोतु सौख्यं विभो ।
बिभ्यद्गारुडभीतितोगतिपरं[1] त्वामेव याचे शिव
तत् त्राणाय भवाधुना शरणद त्वत्तोऽभिकाङ्क्षे वरम् ।।

1. द्रुह्यद्गारुडभीतितः परगतिं ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सूतः (उवाच)

तस्यास्स्तुत्यवचो निशम्य भगवानुग्रोऽप्यनुग्रस्तदा
नागानां ह न वो भयं गरुडतो भूषाङ्गजाता[1] हि मे ।
केचित्कङ्कणतां भजन्तु भुजगा जूटोरुबन्धास्तथा
पादाद्यङ्घ्रिजनूपुरा वरमहामालायिताः केऽपि मे ।
मत्कण्ठाभरणाश्च कुण्डलवरा यूयं भवन्त्वद्य मे (?) ।। २७ ।।

ईश्वरः (उवाच)

पातालेनिवसन्तु सन्ततमुमाकान्ताश्रयाः शाङ्करा-
चारोदारकुमारदारसहिताः काकोदरा मत्पराः ।
दिव्यं मे वरलिङ्गमद्भुततमं श्रीहाटकेशाभिधं
त्वभ्यर्च्यानुदिनं सदैव नियतं भस्माङ्गरागादराः ।। २८ ।।

न विष्णुचक्रान्न यमस्य दण्डा-
न्न पाशिपाशान्न च शक्रवज्रात् ।
न वो भयं वै भुजगा भवेत्क्वचि-
न्मत्पादसंसेवनतो गरुत्मतः ।। २९ ।.

सूतः (उवाच)

इत्युक्तं नगजापतेर्वरवचः श्रुत्वैव नागा हि ते
मात्रा तुष्टहृदब्जसद्मवसतिं न त्वोचुरित्थं वचः ।
तान्नागाननुगृह्य देविसहितः स्थानं ययौ तन्नगं
कैलासं समयादसौ गिरिजया हर्षोरुधारावृतः ।। ३० ।।

1. मम अङ्गभूषार्थं जाता हि यूयमित्यर्थे ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नागाः (ऊचुः)

शम्भो वयं तव विभूषणतो हि धन्याः ।। ३१ ।।

स्कन्द (उवाच)

इत्थं संस्तुत्य शम्भुं वरविवरमहो भूमिपातालमूलं
ईशाज्ञातो विविशुरवशा भक्तितः पाविताशाः ।
दिव्यं तद्धाटकेशं प्रथितमणिगणोत्तुङ्गलङ्गंभजन्तः
काङ्क्षन्तो मुक्तिसिद्धिं किल बिलशयकाः शाम्भवाः शम्भुभक्ताः ।।

।। इति श्रीशिवरहस्ये अष्टमांशे शिवप्रसादो नाम षड्विंशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। सप्तविंशोऽध्यायः ।।

स्कन्द उवाच

शेषोऽपि हाटकेशाख्यं लिङ्गं शम्भोः सदैव हि ।
सर्पैः पातालविवरे पूजयामास भक्तितः ।। १ ।।

भस्मरुद्राक्षसम्पन्नः पञ्चाक्षरपरायणः ।
रुद्राक्षमालाभरणो महेशचरणाश्रयः ।। २ ।।

कद्रूसुतवरस्तत्र सदा रुद्रजपादरः ।
स्वफणामणिभिस्तत्र कृत्वा शर्वालयं महत् (?) ।। ३ ।।

प्राकारगोपुरोपेतं मणिसौधशतोत्तरम् ।
सर्पाणां मालयाज्येव क्रमेण परितस्तदा ।। ४ ।।

महासौधगणाकीर्णं सप्रतोलीकमुत्ततम् ।
नागैश्च नागनारीभिरावृतं तच्चकार वै ।। ५ ।।

महेश्वरप्रसादेन शेषो वै विश्वकर्मणा ।
अशेषभुजगानां च कद्र्वाश्चैव वरालयम् ।। ६ ।।

लिङ्गालयान्यपि सदा परितस्सञ्चकार वै ।
तक्षकेशमनन्तेशं कम्बलाश्वतरेश्वरौ ।। ७ ।।

एलापतीश्वरं चैव तथा कार्कोटकेश्वरम् ।
धृतराष्ट्रेश्वरं चैव गुलिकेशं भृतीश्वरम् ।। ८ ।।

शङ्खेश्वरं पिचण्डीशं वारणेशं द्रुतीश्वरम् ।
सर्पेशं वामनेशं च खर्वटेशं च वासुकिम् ।। ९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एतानि दिव्यलिङ्गानि स्थाप्य तत्र भुजङ्गमाः ।
मणिधामगतान्येव कृत्वा तानि महेशितुः ।। १० ।।

पाताले हाटकेशस्य परितो नागसत्तमाः ।
दिव्यपूजाभरैर्नित्यं पूजयामासुरीश्वरम् ।। ११ ।।

तत्पूजाविस्तरं वक्ष्ये तत्स्तुतिं च श्रृणु प्रिये ।। १२ ।।

सूतः (उवाच)

फणामणिगणव्रज प्रभवगर्भधामामृत-
प्रभं वर सुहाटकेश्वरमहोरुलिङ्गोत्तमम् ।
सुबिल्वदलपङ्कजैः कनकचम्पकैर्मल्लिका-
कदम्बकरवीरजैः सुमवरैः प्रपूज्योरगाः ।। १३ ।।

लिङ्गं हाटकगर्भमण्डितमहागर्भोरुधामस्थितं
दिव्योत्तुङ्गवृषाद्यरत्नशिखरद्वाराङ्कितं सुन्दरम् ।
प्राकारप्रकरैरपारगणनाहीनस्वमौलीलस-
त्सद्रत्नच्छविभिः प्रदीपितमुमाकान्तलयेषूद्यताः ।। १४

पातालगङ्गाम्बुघटीसहस्र-
धारादिभिः क्षीरदधिप्रभाज्यैः ।
प्राज्यैर्मधुप्रभवसारघटीसहस्रैः
सच्छर्कराफलरसैरपि चेक्षुनीरैः ।। १५ ।।

सन्नारिकेलोदकजम्बुनीर-
रम्भाफलाम्रप्रभवैश्च पनसैः ।
गन्धोदकैश्चन्द्र उशीरपाटला-
तक्कोलकाङ्कोलसुवासितैर्जलैः ।। १६ ।।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आज्यैश्च गव्यैर्वर पञ्चकाद्यै[1]-
रालिप्य लिङ्गं धवलैश्चवस्त्रैः ।
सद्रत्नभूषाफणिगोलकाङ्कितै
रत्नैश्च निष्टप्तसुवर्णयुक्तैः ।। १७ ।।

तगरागरुधूपसम्भवै-
रथ गन्धैर्मणिदीपकोटिभिः ।
परिफुल्लसुपङ्कजार्कबिल्वै-
रपि मल्लीकरवीरजाजिपुष्पैः ।। १८ ।।

मरुवदमनकस्त्रजादिभारैः
परिपूज्य प्रमथाधिपोरुलिङ्गम् ।
भुजगा जगतां महेशमेवं
वरनैवेद्यभरैः फलैश्च भक्ष्यभोज्यैः ।। १९ ।।

स्रक्ताम्बूलदुकूल विहिता
लङ्कारचन्दनालिप्तं लिङ्गमुमापतेः ।
प्रियतमं नीराजयन्ति
द्विज दीपानां च सहस्त्रकैः ।।

स्रक्ताम्बूलदुकूलवर्यविहितालङ्कारसच्चन्दना-
लिप्तं लिङ्गमुमापतेः प्रियतमं नीराजयन्ति द्विज
दीपानां च सहस्त्रकैर्वरमहाकर्पूरखण्डोत्थित-
ज्वालाजालनिरस्तदिक्तमततिं ते पन्नगाः शङ्करम् ।। २०

1. प्रसिद्धैः पञ्चगव्यैः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हाटककटकं महेशलिङ्गे
परिसंवेष्ट्य मुदाननोत्त्थरत्नैः ।
स्वफणाछदि सुन्दरेशमूर्ध्नि
वरिवस्याभिरहो समर्चयन्ति ।। २१ ।।

स्वच्छेन्दुधामपरिमण्डल सन्निभोरु-
निष्टप्तरुक्मवरदण्डसुमण्डितैश्च ।
सच्छत्रपङ्क्तिवरचामरकोटिकोटि-
भ्राजत्पताकनिकरैर्व्यजनैरपारैः ।। २२ ।।

आदर्शदर्शवरनाट्यमहोत्सवोद्यद्-
ध्वानैर्जिताम्बुधिरवैर्वरदुन्दुभीनाम् ।
सत्काहलैर्वरमृदङ्गसुशङ्खनादैः
सङ्घोष्य शङ्करमहालयमध्यमेवम् ।। २३ ।।

तौर्यत्रिकैर्हरहरेति रवैर्भुजङ्गा
नृत्यन्ति लिङ्गसविधे मुदिताः कृतार्थाः ।। २४ ।।

श्रीरुद्रवीणायुतवाणिपाणि
पद्मप्रभोत्थैर्नखरैर्नखाग्रैः ।
तदुक्तिरागोत्तमगानधारा
नाम्नां च शम्भोश्च नयन्ति कालम् ।। २५ ।।

तदङ्गणसुनीलिमाविधुतकालिनानं कुच-
प्रकर्षभुजगाङ्गनाः परिलसत्कपोलश्रियः ।
चलद्दलनमण्डनैः प्रथितकुण्डलान्दोलनै-
र्नयन्ति किल वीणया शिवमहेशगानादराः ।। २६ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ता नागाभरणोरुलिङ्गसदने नृत्यन्ति नागात्मजाः
नागास्याः प्रसभोरुकाण्डसुमहापादा झणन्नूपुराः ।
पश्येशेति हरेति शङ्करमहादेवेति नित्यं सदा
वीणावेणुमृदङ्गनिःस्वनलयैः सोमोरुधामाननाः ।।

शेषोऽप्यशेषवदनैर्भुजगोरुभूष-
पूषोज्ज्वलाक्षभसितोत्तमभूषिताङ्गम् ।
योषार्धकाय नवमाषनिकाशकण्ठं
सन्तोष्य शङ्करमहो स्तुवति प्रदोषे ।।
(अस्तौत्प्रदोषसमये परितुष्टचेताः ।।) २८

द्विजिह्वफणिभूषणं शशिहुताशसूर्येक्षणं
सुपङ्कजदलेक्षणं प्रथितपूजया तोषणम् ।
गरोल्बणविशेषणं मदनकालसंहारणं
कुरङ्गशिशु धारणं सुरवराद्यसत्कारणम् ।। २९ ।।

मातङ्गानङ्गभङ्गान्धकहर भगवन् पाहि मामीश दृष्ट्या
वृष्ट्यैवोत्फुल्लसस्यं प्रभवति हि तथा तद्वदीशान शम्भो ।
दुःखै रोगादिरागैरसुतनुव्यसनैरात्तपापं महेश
त्वपादाब्जावलोकान्न हि मम सुकृतैर्लोकसङ्घैः फलं मे ।।

श्रीहाटकेशसमधिष्ठितनागलोके
पापाद्भयं न गरुडादिपि पन्नगानाम्[2] ।
नागा नगारि करवज्रमहोरुधारा-
सम्पातनाच्च सुखिनः शिवपूजयन्ते[3] ।। ३१ ।।

इति श्रीशिवरहस्ये अष्टमांशे शेषकृतहाटकेशार्चनं नाम सप्तविंशोऽध्यायः

1. शशाङ्कशिशु । 2. पन्नगानाम् । 3. शिवमर्चयन्ति

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। अष्टाविंशोऽध्यायः ।।

स्कन्द उवाच

हाटकेशं समभ्यर्च्य शोषोऽशेषमुखैः स्तुवन् ।
रुद्रसूक्तैर्महादेवं सम्पूज्य परमेश्वरम् ।। १ ।।

बिल्वपत्राम्बुजैश्चैव उत्पलैः कुमुदैस्तथा ।
गन्धैश्च धूपदीपैश्च नैवेद्यैर्विविधैरपि ।। २ ।।

स्वफणामणिभिर्नित्यं पूजयामास शङ्करम् ।
पञ्चामृतप्रवाहैश्च फलभारैर्महेश्वरम् ।। ३ ।।

स्वफणाच्छादिभिर्नित्यं छादयँलिङ्गमस्तकम् ।
त्रिपुण्ड्रफालविलसत्सहस्रास्यैस्तदा मुदा ।। ४ ।।

सहस्रमौलिमाणिक्यैः शम्भोर्गर्भगृहं तदा ।
दीपयामास शेषोऽसावशेषभुजगेश्वरः ।। ५ ।।

छत्रैश्च चामरैर्दिव्यपताकादर्शवाद्यकैः ।
नागकन्यानर्तनैश्च वीणादिध्वनिभिस्तदा ।। ६ ।।

स्तुवन्ति गानधाराभिर्नागकन्या महेश्वरम् ।
अस्तदोषे प्रदोषेऽसौ नित्यं सम्पूजयन्हरम् ।। ७ ।।

एवं स्तुवन्नुवासासौ शेषो भुजगपः सुखम् ।
सह मात्रा मुदा तत्र हाटकेशं प्रपूजयन् ।। ८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चक्षुःश्रवास्ते श्रृण्वन्ति[1] शिवनामसुधारसम् ।
सहस्राक्षोऽपि यः शेषो धन्यैः स्वैर्नेत्रमण्डलैः ।। ९ ।।

वीक्ष्यैव हाटकेशाख्यं सर्वाङ्गोत्फुल्लकण्टकः ।
एकैकास्येन नामैकं बिल्वैः सम्पूजयन्हरम् ।। १० ।।

नाम्नां सहस्रैरीशानं विश्वेशं करुणाकरम् ।
संस्तौति विवशो नित्यं पन्नगः सन्नगोपमः ।। ११ ।।

स चुक्षुःश्रवसां राजा सहस्रपरिवत्सरम् ।
वाय्वाहारः सदा शेषो ह्यशेषवदनैः स्तुवन् ।। १२ ।।

भक्त्यैव देवदेवशं स समीरणपारणः ।
समाकर्णय विप्रेन्द्र तत्स्तुतिं सावधानतः ।। १३ ।।

शेष उवाच

सुरवरतटिनीवृतोत्तमाङ्गं
स्फुरदुद्यद्रविसन्निभेन्दुचूडम् ।
अकपटकवचनान्तमृग्यपादं
करटित्वक्पट हाटकधूर्जटिं भजामि ।। १४ ।।

वरहाटयुक्तगोवृषस्थं
शिवमाशास्यमुमासखं देवम् ।
निटिलानलदग्धकामं
कालहरं हाटक धूर्जटिं भजामि ।। १५ ।।

1. श्रृण्वन्ति चक्षुःश्रवसः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पटुवटुमुनिभिर्निषेव्यमाणं
वटभूरुहतलकृतोटजं महेशम् ।
अघटनघटनापटुमाया-
तमसः पाटनहाटकेशमीक्षे ।। १६ ।।

तटिन्निभजटाकुटीविधृतसामिसोमप्रभा-
विभासितजगत्-त्रयं स्फुटकृपीटयोनीक्षणम् ।
कटस्थमगजापतिं कराटिकृत्तिभास्वत्कटिं
सुघोटककृतागमं सरभसं भजे धूर्जटिम् ।। १७ ।।

आसत्यलोकावधिमौलि चैत-
त्पातालमूलं वरशाङ्गलिङ्गम् ।
श्रीहाटकेशं भजे वेदमौलि-
जालैकवेद्यं भुजगाङ्गभूषम् ।। १८ ।।

सूत उवाच

एवं शेषस्तवं श्रुत्वा तल्लिङ्गोत्तुङ्गमौलितः ।
निर्गत्यार्कसहस्राभ उमया सहशङ्करः ।। १९ ।।

काकोदरमहाहारो हरः सर्वामरेश्वरः ।
ललाटपटलोद्भासि त्रिपुण्ड्रकुटिलालकः ।। २० ।।

स्फटिकाचलसङ्काशः कुटिलान्तरदुःखदः ।
चटुलाननकञ्जाक्षः करटित्वग्धरो हरः ।। २१ ।।

महानटोत्थविकटोद्यट्टहासगिरावदत् ।
तव स्तुत्यानया शेष सविशेषतया स्तुतः ।। २२ ।।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अशेषभूमिधरणे सामर्थ्यं ते ददाम्यहम् ।
विश्वम्भराधरोऽसि त्वं सदा विश्वाधिकार्चनात् ।

शाम्भवोऽस्युरगश्रेष्ठ न ते भारो धराधृतौ ।
इति शम्भोर्वचः श्रुत्वा फणिराजः प्रणम्य तम् ।। २४ ।।

उवाच विनयोदारं वचः काकोदरो हरम् ।। २५ ।।

शेष उवाच

काङ्क्षेऽक्षतं तव विभो पदभक्तिभावं
काकोदरांश्च न दुरोदरवत्सरादीन् ।
नष्टांस्त्रिविष्टपगतानपि भक्तिनिष्ठो
नेष्टेऽधुना तव पदं शिपिविष्टमिष्टम् ।। २६ ।।

अस्माभिरेतदमलं शशिधामचूड-
मीड्यं च वेद्यशिखरं हर हाटकाख्यम् ।
लिङ्गं सुमङ्गलकरं शिवया समेत-
माजीव्यमस्तु शिवदं पशुपाशमुक्त्यै ।। २७ ।।

किं वा लोकेऽनुलोके निगमशिखिशिखाभारणंहोद्य-[1]
न्मारापारशरातुराः सुरवरा भाराभुवः केवलम् ।
वीरोदार कुमारवादचतुराः संसारवार्तारसाः
स्वाराज्यं शिवपादपङ्कजवरं नाराधयन्ति क्षणम् ।।

इत्युक्त्वा गिरिजामनोहरवचः श्रुत्वादिशेषो हरं
नत्वाह श्रुतिवीक्षणोऽथ भगवन् चाज्ञां करिष्ये तव ।

1. किं वा लोकेऽनुलोके निगमशतशिखामात्रवेद्यं त्वदन्य-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नागानागाजिनाङ्गं नगशिखरमहाचारुधामङ्घ्रिरेणुं
मूर्धन्याधाय धन्या मदमुदितधिया तस्थुरिच्छाविहाराः ।।

हाराः काकोदरास्ते हरपरयुगलध्यानमात्रानुसारा
वीरोदार कुमारदार सहिताः शम्भुप्रसादादराः ।। ३० ।।

स्कन्दः (उवाच)

एवं बलं बिलशयेशवरस्य दत्वा-
बालद्विजावनकरोबल एव शम्भुः ।
बलप्रमथनोऽर्चितो बलिसुतार्च्यलिङ्गालयो
ययौ द्रुतमुमाधवो वरभुजङ्गहारोज्ज्वलः ।। ३१ ।।

।। इति श्रीशिवरहस्ये अष्टमांशे शेषस्य शिवप्रसादो नाम
अष्टाविंशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। एकोनत्रिंशोऽध्यायः ।।

स्कन्द (उवाच)

पातालमूले देवेशं पूजयन्ति बिलेशयाः ।
भस्मरुद्राक्षसम्पन्नाः शिवध्यानहताशुभाः ।। १ ।।

गूढपादा मृडध्याना दृढभक्तिरताः सदा ।
वासुकिप्रमुखाः सर्वे तक्षकाद्याश्च भोगिनः ।। २ ।।

तक्षकेशं तक्षकोऽपि सम्पूज्याम्बुजबिल्वजैः ।
गन्धधूपैश्च दीपैश्च नैवेद्यैर्विविधैरपि ।। ३ ।।

नीराजनाद्यैर्नात्यैश्च नागकन्याकृतैस्तदा ।
सम्पूज्य स्तौति हृष्टात्मा तक्षकेशं स तक्षकः ।। ४ ।।

तक्षकः (उवाच)

शम्भो विरिञ्चिवरमौलिकपालपाणे
चञ्चत्सुधांशुमकुटोज्ज्वलितोत्तमाङ्ग ।
मां मोचयाशु दुरितात्परिवञ्चकेश
देवस्त्वमेव भगवांश्च कुलुञ्चनाथः ।। ५ ।।

मृडं दृढतरं हृदा सदयमिन्दुचूडं हृदा
भजामि भसितोज्ज्वलं हृदयपद्मसद्मान्तरे ।
भुजङ्गवरकङ्कणक्वणननिःस्वनाङ्घ्रिप्रभा-
विभासिनटनानतं जगदुदारसत्ताण्डवम् ।। ६ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सूतः (उवाच)

वीक्षाशिक्षितमन्मथं सुरगणाध्यक्षं महोक्षप्रियं
पक्षीन्द्रप्रियबाहुवीक्षणलसत्पादाम्बुजं शङ्करम् ।
भक्षीभूतविषं सुदक्षमथनं भिक्षुप्रियं तं सदा
चक्षुः श्रोत्रवराश्च तक्षकमुखा आराधयन्नीश्वरम् ।। ७

अनन्तेशमनन्तोऽपि बिल्वैः सम्पूज्य भक्तितः ।
गन्धपुष्पैश्च विविधैर्नैवेद्यैरपि शङ्करम् ।। ८ ।।

धूपदीपाङ्गनानाट्यैः स्वफणामणिभूषणैः ।
लिङ्गमालिङ्ग्य भोगेन भोगिवर्योऽस्तुवद्धरम् ।। ९ ।।

अनन्तः (उवाच)

भस्माङ्गराग धृतबालकुरङ्ग सङ्ग
फालस्फुलिङ्ग हर (कृत) नेत्रपतङ्गलिङ्ग ।
गङ्गान्तरङ्ग महदिन्दुकृतोत्तमाङ्ग
मातङ्गकृत्तिभुजगाङ्गद हार पाहि ।। १० ।।

पापानङ्गमतङ्गभङ्गसुमहालिङ्गस्थ शम्भो सदा
शाङ्गाङ्गस्थमहोक्षसङ्गभरितानन्दाङ्ग गङ्गाधर
मां पाह्यद्य हरान्धकस्मरहारमेयप्रभावेश्वर
विश्वाधीश्वर चन्द्रशेखर विभो कारुण्यदृक्सङ्गतः ।।

कम्बलाश्वतरेशानं कम्बलाश्वतरौ सदा ।
सदा पूजयतः शम्भुं बिल्वमन्दारपङ्कजैः ।। १२ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तुष्टुवाते हि भुजगौ तल्लिङ्गं भक्तिभावतः ।। १३ ।।

कम्बलाश्वतरावूचतुः

भगवन्मदशमनाद्यवैद्य वेद-
प्रतिपाद्येश्वर विद्ययाभिवेद्य ।
त्वं पर्णशद्य सुमहन् च महेशनाद्य
आलाद्य सर्वतनुगोऽपि अभेद्य शम्भो ।। १४ ।।

तं कम्बलाश्वतरगीतसुसामसीम-
श्रीवामदेव वरसाम रथन्तरेड्यम् ।
श्रीव्योमकेशमुमया परिपूज्यबिल्वै-
स्तौ तुष्टुवाते भुजगौ महेश्वरम् ।। १५ ।।

एलापत्रेश्वरं लिङ्गं एलापत्रोरगेश्वरः ।
सम्पूज्य बिल्वैः स्वफणामणिमालोपहारकैः ।। १६ ।।

स्तौति देवं सदा भक्त्या फणाभृल्लिङ्गमैश्वरम् ।। १७ ।।

एलापत्रः (उवाच)

वन्दे कुरङ्गकरसङ्ग भवोरुभङ्गं
भस्मभिभूषितमनङ्गमतङ्गभङ्गम् ।
गङ्गातरङ्गविलसज्जटिलोत्तमाङ्गं
श्रीलिङ्गमेतदगजाहृदयान्तरङ्गम् ।। १८ ।।

एलापत्रस्त्रिणेत्रं स्वकफणिविलसद्धन्यगात्रोरुवेष्टै-
स्तल्लिङ्गाकण्ठलग्नो विधृतनवफणारत्नसञ्छादितश्रीः ।
बिल्वैश्चन्दनलेपसुन्दरमहाकायैश्च शीतैः शिवं
सन्तोष्यानुदिनं वसत्युरगपः पुण्ये प्रदोषेऽपि च ।। १९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कार्कोटकेश्वरं भक्त्या नागः कार्कोटकोऽर्चयन् ।
बिल्वमन्दारपुन्नागचम्पकाशोकपङ्कजैः ।। २० ।।

धूपदीपोपहाराद्यैः स्तौति शर्वं महेश्वरम् ।। २१ ।।

कार्कोटकः उवाच

श्रीनीलकण्ठ सितभस्मवरावकुण्ठ
वैकुण्ठनाथनयनार्चित पादपद्म ।
उत्कण्ठभावुकहृदा परिचिन्तनीय
पादाम्बुजे परिलुठामि च सन्नकण्ठः ।। २२ ।।

धृतराष्ट्रेश्वरं भक्त्या धृतराष्ट्रो भुजङ्गमः ।
बिल्वपङ्कजमन्दारबिल्वैरभ्यर्च्य शङ्करम् ।। २३ ।।

नैवेद्यैर्धूपदीपैश्च नित्यमभ्यर्च्य शङ्करम् ।
स्तौति प्राञ्जलिरीशानं स्वफणामवनामयन् ।। २४ ।।

धृतराष्ट्रः (उवाच)

हर हर गरकण्ठ पार्वतीश
त्रिदशामेयगुणाकर प्रसीद ।
हर हर शितिकण्ठ सामिसोमो-
ज्ज्वलितोत्तंस यमीन्द्रचित्तहंस ।। २५ ।।

गुलिकोऽपि सदालिङ्गमर्चयन्गुलिकेश्वरम् ।
बिल्वैः फणामणिव्रातैर्धूपदीपनिवेदनैः ।। २६ ।।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अभ्यर्च्य स्तौति हृष्टात्मा सुलिङ्गं सर्पपुङ्गवः ।। २७ ।।

गुलिकः (उवाच)

सशङ्खचूडः(डं) शशिचूडमीश-
मीड्यं सदा वेदवचोभिरेव ।
भस्माङ्गरागच्छविसन्निकर्षा-
द्विकर्षयत्येव च ततोऽन्धकारम्[1] ।। २७ ।।

देव देव परमेश्वर शम्भो
विश्वनाथ मम नाथ सनाथम् ।
मां कुरुष्व दययाद्य कृपालो
मन्मथान्तक विभो शशिचूड ।। २८ ।।

शङ्खचूडेश्वरं लिङ्गं शङ्खचूडोऽर्चयन् सुमैः ।
बिल्वाम्बुजैः सदा भक्त्या भुजङ्गो भस्मभूषणः ।। २९ ।।

नैवेद्यैर्धूपदीपैश्च नृत्यन्संस्तौति भक्तितः ।। ३० ।।

शम्भो कन्दर्पसर्पज्वरहर पुरहन् पाहिमामीश दुःखात्
दुर्वाराखर्व(नल्प)गर्वं जनिमृतिविवशं रोगपापादियुक्तम् ।
कल्पानल्पजलोद्भवोद्भवमहासृष्टौ लुठन्तं सदा
त्वन्मौलिस्रगलङ्कृताङ्गकमहालिङ्गोत्तमाङ्ग प्रभो[2] ।।

पिचण्डिलेश्वराख्यं च वरिवस्याभरैस्तदा ।
स्तौति देवं समभ्यर्च्य नागो ह्यानन्दतुन्दिलः ।। ३२ ।।

---

1. द्विकर्षयन्तं च मनोऽन्धकारम् ।
2. त्वं मां मौलिस्रगात्मना कुरु महालिङ्गोत्तमाङ्गे प्रभो ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पिचण्डिलः (उवाच)

मस्ताजस्रगलङ्कृताङ्गक महासर्पाङ्गभूषोज्ज्वल
नेत्रोन्मेषनिमेषणेषितजगद्रात्रीशचूडोज्ज्वल ।
पाहीश त्रिदशोत्तमोत्तमा सदा सामौक सीमास्तुत
कामाङ्गप्रहरावकामद सदा मां वामदेव प्रभो ।। ३३ ।।

वारणो ह्युरगेन्द्रोऽसौ वारणत्वग्ववसा(वरा)र्चकः (चितः) ।
निवारणकरं देवं पापनाशकरं परम् ।। ३४ ।।

मदवारणवक्त्राद्यपुत्रं संस्तौति भक्तितः ।। ३५ ।।

वारणः (उवाच)

पाहीन्दुद्युतिजूटकूट(नाक) तटिनीगर्तादिनिर्वापण
त्वं कल्याणनगात्तसत्करधनो[1] जेता जगत्कारणम् ।
भस्माहीन(न्दु)सुभूषणोत्तम सदा कामाङ्गसंहारण
सर्वप्राणहरान्तकप्रहरणामेयाङ्घ्रिपद्मारुण ।। ३६ ।।

द्रुतीशं द्रुतिको नागः सम्भूज्य प्रमथाधिपम् ।
बिल्वमन्दारकञ्जादिमालाजालोत्पलैरपि ।। ३७ ।।

स्तौति प्रसन्नहृदयः फणिराट् फणिभूषणम् ।। ३८ ।।

द्रतिकः (उवाच)

रामासंहननार्धकायविलसत्सोमोज्ज्वलन्मूर्धक
धूतोद्दामशिरः कपर्द सुमहाधूमाङ्कनेत्रोज्ज्वल ।

1. हस्तकमलो

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भूमानन्दघन प्रसीद भगवन् त्वं व्योमकेशः श्रुतेः (श्रुति)
सीमा(व्रातैः) संस्तुतपादपद्म मम हृत्कामप्रदाव प्रभो ।।

सर्पेशं वरसर्पेशः सम्पूज्य श्रीपद(तरु)च्छदैः ।
निवेदनैर्धूपदीपैः संस्तौति परमादृतः ।। ४० ।।

सर्पः (उवाच)

शिष्टार्चितं सकलकष्टहरं प्रकृष्ट-
मोक्षप्रदं किलसदा शिपिविष्टलिङ्गम् ।
अष्टाकृतिं च भजतां न हि दुष्टभावो
नष्टाशुभा भुवि भवन्ति सदैव सर्पाः ।। ४१ ।।

वामनेशं तत्र लिङ्गं वामनो भुजगोत्तमः ।
बिल्वाम्बुजैः समभ्यर्च्य संस्तौति परमेश्वरम् ।। ४२ ।।

वामनः (उवाच)

उच्चैर्घोषादिशेषक्षितिधरवरधृक् पोषिताशेषलोक
सृष्टिस्थित्यन्तकार्येष्वतितरमनिशं जागरूक प्रभो माम् ।
वेदार्होत्तम हेषघोषितपदाम्भोजप्रभाभावतो
वेषाकारमिदं सदा त्रिभुवनं मन्ये किमन्येन मे ।। ४३ ।।

खर्वाटेशं खर्वटाख्यो नागोऽभ्यर्च्य सदाम्बुजैः ।
बिल्वपत्रैः सदेशानं सदा बिलशयोत्तमः ।। ४४ ।।

स्तौति वेदान्तवाक्यैस्तैरम्भोजैः पूज्य शङ्करम् ।। ४५ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

खर्वटः (उवाच)

त्वद्भीषाभीषितास्ते सुरवरनिकराश्चन्द्रसूर्यानिलेन्द्रा-
स्त्वद्मासा भासतेदं जगदिदमखिलं लोकजालैर्महेश ।
विष्णुब्रह्ममरुद्गणादिजनकः सोमोऽसि सर्वान्तरः
कस्त्वां स्तौति महेश सर्वतनुभाक् त्वं निर्गुणोऽस्यव्ययः ।।

वासुकिर्वासुकीशानं बिल्वैरभ्यर्च्य शङ्करम् ।
संस्तौति हृष्टो नियतं कुण्डलीशो महेश्वरम् ।। ४७ ।।

वासुकिः (उवाच)

क्षयद्वीर काकोदरापारहार
स्फुटत्स्फारकर्पूरगौरावहीर-
प्रभाजाल निर्मूलितालोलपाशा-
त्तकाल त्रिकालाकुलाकारमारव्यथासारसंहार
उद्धतदु (भस्मीकृत)त्रैपुराकार गङ्गाधरामेय-
मातङ्ग चर्माम्बर नीलोत्पलाकारकण्ठ स्फुर-
त्सान्द्र गौरीकुचाश्लेषगाढप्रभावाङ्ग सञ्जात
सङ्कण्टकाङ्ग प्रभो पाहि माम् ।। ४८ ।।

एवं संस्तुत्य ते सर्पाः कन्दर्पहरमीश्वरम् ।
पाताले दिव्यलिङ्गेषु हाटकेशादिषु द्विजाः ।। ४९ ।।

वदन्ति नियतं तेषु भुजगाः शाम्भवोत्तमाः ।। ५० ।।

1. स्त्वद्मासा भाति सर्वं जगदिदमखिलैः लोकजालैर्महेश ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सर्पाः (ऊचुः)

अस्माकं कुलदैवतं शशिकलाजूटानुकूटोद्यत-
स्फाराकारभूजङ्गहारवलयालङ्कार लिङ्गोत्तमम् ।
घोटीभूतमहागमान्तशिखरं जूटीकृताहीश्वरं
पाटीरद्रवसार चन्दनलसत्कोटीरमीक्षेमहि ।। ५१ ।।

स्कन्द उवाच

एवं सर्पेश्वरास्ते स्वफणमणिगणैरिन्दुडचूडोरुलिङ्गं
बिल्वैर्मन्दरापुष्पैर्हरिहरविधिभिः पूजितं शङ्कराङ्घ्रिम् ।
स्वैर्भोगेश्च भुजङ्गमेश्वरमहालिङ्गोत्तमाङ्गोज्ज्वलं
सोमोत्तंस सरिद्वरोद्भवमहाशीतादिवाताशनाः ।। ५२

सर्पाः पर्वतनन्दिनीसहचरं सम्पूज्य बिल्वच्छदैः
अच्छैस्स्वैस्वैर्मणिभिर्विदीपिततमःस्तोमं महेशालयम् ।
कुर्वन्ति प्रसभं प्रदोषसमये श्रीहाटकेशार्चकाः
तेनैव स्वकदेहजत्वचमिषात्पापाद्विनिर्मुच्यते ।। ५३ ।।

तिष्ठन्तीश्वरगात्रभूषणवराः सौख्येन पातालगाः
लीलाकालकृताऽऽनतेषु गदजा पीडा न मृत्यूद्भवा ।
नो जन्मादिभयं जरादिक(ज)महो कद्रुद्रसंसेवनात्
एको नाक्षियुगेन दिव्यगिरिजालङ्कारलिङ्गोत्तमम् ।।

1. अच्छाच्छैर्मणिभिर्विदीपिततमःस्तोमं महेशालयम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वीक्षन्ति(न्ते) श्रुतिसारशङ्करकथाः श्रृण्वन्ति ते कद्रुजाः
पाताले निगलोपमेऽपि दितिजाः श्रीकालकालार्चकाः ।
व्यालेन्द्रा गरलाशिशङ्करमहालिङ्गार्चकाः शाङ्कराः
पातालेह्युरगेश्वरप्रभृतयः शेषाद्यशेषाः शिवाः ।। ५५ ।।

लिङ्गेषु प्रथितेषु हाटकमहालिङ्गं सकार्कोटक-
त्रुट्यत्पातकसन्ततिस्वकफणामाणिक्यपूजादिभिः ।
बिल्वानां प्रकरैः सदम्बुजवरैः पुष्पैश्च दीपादिभिः
कर्पूरागरुसम्भवैश्च ससुरामेदैश्च नित्यं शिवम् ।। ५६

सम्पूज्यैव वसन्ति गूढपदकाः दार्ढ्येन शम्भोःपदं ।
ध्यायन्त्येव सदानुरक्तहृदयाः सर्पा विरक्ताः सदा ।
लिङ्गं तद्वरहाटकेशमुमया पश्यन्ति चक्षुःश्रवाः ।। ५७

।। इति श्रीशिवरहस्ये अष्टमांशे सर्वनागकृतपातालिङ्गपूजा नाम एकोनत्रिंशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। त्रिंशोऽध्यायः ।।

स्कन्द उवाच

दिग्गजा अपि ते चाष्टौ अष्टमूर्तिं कृपाकरम् ।
स्वनाम्ना स्थाप्य लिङ्गानि स्वपुष्करजलाम्बुजैः ।। १ ।।

स्नात्वा पातालगङ्गायां स्वशुण्डावलयोद्भवैः ।
स्वर्णकुम्भोद्धृताम्भोभिः धृतगण्डत्रिपुण्ड्रकाः ।।

धृतरूद्राक्षकवचाः कक्ष्यारूपेण ते गजाः
पूजयन्ति च लिङ्गानि स्वस्यां दिशि गजोत्तमाः ।। ३ ।।

गजचर्माम्बरधरं तानि (तान्नि) वक्ष्याम्यनुक्रमात् ।
ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।। ४ ।।

पुष्पदन्तः सार्वभौमः सुप्रतीकोऽथदिग्गजः ।
पूर्वेचैरावतो भाति श्वेताद्रिरिव जङ्गमः ।। ५ ।।

चतुर्दन्तो महाकायः करेणुकलभावृतः ।
मदधाराकटोल्लासिभ्रमद्भृङ्गशतावृतः ।। ६ ।।

मणिधामगतं कृत्वा लिङ्गमैरावतेश्वरम् ।
सम्पूज्य बिल्वमन्दारैर्धूपदीपनिवेदनैः ।। ७ ।।

स्तौति चोद्धृत्य शुण्डाग्रं मुण्डमालाधरं हरम् ।। ८ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ऐरावतः (उवाच)

शान्तं शङ्कमतङ्गकान्तकमुमाकान्तं भजाम्यन्तिक-
स्वान्तानन्तमहान्तकोद्भवभयं किं वोपलक्ष्यं मम ।
विश्वाधीश्वर शाश्वतान्धकहरापारव्यथासंहर
घोरापारभवोरुसागरगदापारादि दुःखं हर ।। ९ ।।

एवं संस्तौति हृष्टात्मा सदैवाभ्रमुवल्लभः ।
पुण्डरीकस्तथाग्नेय्यां किञ्जल्कसदृशच्छविः ।। १० ।।

ऊर्णया च करिण्या वै कलभैरपि संवृतः ।
चतुर्दन्तो महाकायो मदप्रस्रवणान्धदृक् ।। ११ ।।

पुण्डरीकेश्वराख्यं तदाग्नेय्यां मणिधामगम् ।
प्रतिष्ठाप्य महालिङ्गं श्रद्धया भीममीश्वरम् ।। १२ ।।

पुण्डरीकैश्च बिल्वैश्च स्वशुण्डावलयोद्धृतैः ।
समर्चयित्वा() संस्तौति बृंहितैर्घोषयन्त्सदा ।। १३ ।।

पुण्डरीकः (उवाच)

पाहि त्रिणेत्र सुचरित्र पवित्रगात्रं
पाह्यब्जमित्रनयनामलभूतिगात्र ।। १४ ।।
मामीशशङ्खधवलेन्दुकलाललाम
पाहीश मामकधिया सकलेषु मित्र ।। १४ ।।

एवं संस्तौति च भुवं धारयन्त्स महागजः ।
वामनो दक्षिणे तिष्ठन् उद्यत्कुम्भो महेश्वरम् ।। १५ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कर्णाग्रचामरोल्लासमदगन्धान्धदिक्तटः ।
वर्णेन कर्बुरो विप्र मृग्या स कलभैर्वृतः ।। १६ ।।

वामनेशाभिधं लिङ्गं मणिधामगतं तदा ।
कृत्वा बिल्वाम्बुजैः पूज्य वारणः पापवारणम् ।। १७ ।।

शुण्डामावृत्य दन्ताग्रैः स्तौति देवं स दिग्गजः ।। १८ ।।

पाहीन्दिरारमणकारण तारणेड्य
चक्षुःश्रवाभरण कारणहीन शम्भो ।
माराङ्गसंहरण पापनिवारणेश
पाहीन्दुभूषणमहेश गणाग्रगण्य ।। १९ ।।

एवं संस्तौति नियतं दिशास्तम्बेरमो हरम् ।
नैर्ऋत्यां कुमुदोऽपीशं कुमुदोत्पलभासुरः ।। २० ।।

वर्णयामास कलभैः कुमुदेशं महेश्वरम् ।
मणिधामगतं कृत्वा पूज्य बिल्वोत्पलैर्जगौ ।। २१ ।।

विवृत्य नयने कर्णे भक्त्या स्तौति महेश्वरम् ।। २२

कुमुदः उवाच

हे देवदेव जगदीश्वर पञ्चवक्त्र
विश्वम्भराधरणभूषण भीषणेश ।
गौरीमनोरमण सर्वशरण्य शम्भो
आतार्य तारण विभो चरणं नतोऽस्मि ।। २३ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अञ्जनः पश्चिमे भाति पद्मीशो पद्मसन्निभः ।
वारणाकलभैर्युक्तश्चतुर्दन्तो मदस्रवः ।। २४ ।।

अञ्जनेशाभिधं लिङ्गं मणिधामगतं गजः ।
पद्मैर्बिल्वोत्पलैर्भक्त्या मन्दारार्जुनचम्पकैः ।। २५ ।।

निवेद्य फलमूलादि अञ्जनः स्तौति शङ्करम् ।। २६ ।।

अञ्जनः (उवाच)

सरसीरुहनाभवेद(वेत्तृ)वन्द्यं
[1]स्फुरशम्बरवैरिलाञ्छनार्कम् ।
भज भज मनसा शिवाधवां त्वं
भवहरमभयाय चेतसा त्वम् ।।

पुष्पदन्तोऽथ वायव्यां धारयञ्छिरसा भुवम् ।
अतसीपुष्पसङ्काशः पुष्पिण्या कलभैर्युतः ।। २८ ।।

पुष्पदन्तेश्वरं लिङ्गं मणिसद्मगतं तदा ।
बिल्वमन्दारपुन्नागचम्पकैरर्चयन्गजः ।। २९ ।।

संस्तौति नियतं भक्त्या कुम्भसंस्पृष्टभूतलः ।। ३० ।।

कुरु कुरु करुणां शशधरशिशुधर
अतिभयबहुभीतनागलोकरक्षम् ।
शशिहुतवहभानुनेत्रमद्रीश-
प्रियतनयानयनाब्ज भास्करं वन्दे ।। ३१ ।।

1. वरशम्बरवैरिसंहरं हरं तम्

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एवं संस्तौति नियतं द्विरदः सुरसत्तमम् ।
सार्वभौमो गजेन्द्रोऽसौ पाटली पला(कोमला)रुणः ।। ३२

पाटल्या कलभैर्युक्तः सार्वभौमेश्वराभिधम् ।
मणिधामगतं लिङ्गं बिल्वाब्जैः सर्वदार्चयन् ।। ३३ ।।

संस्तौति शुण्डामुद्धृत्य वेतण्डहरमीश्वरम् ।
उत्तरे धारयन्पृथ्वीं कर्णतालैर्मदोद्धतः ।। ३४ ।।

सार्वभौमः उवाच

शङ्गं सङ्गहरं महेशमनधं मातङ्गचर्माम्बरं
गङ्गातुङ्गतरङ्गरङ्गित जटाभारं भुजङ्गाङ्गदम् ।।

मधुमथनाक्षपदाम्बुजं महेशं
भज शम्भुम् भवबन्धविमोचनाय ।। ३६ ।।

सुप्रतीकोऽप्यथैशान्यां सुप्रतीकेश्वराभिधम् ।
लिङ्गं मणीन्द्रसङ्क्लृप्तदिव्यधामगतं गजः ।। ३७ ।।

प्रतीक्या कलभैर्युक्तो गौरवर्णो महाबलः ।
सम्पूज्य बिल्वकमलैस्तथा नीलोत्पलैरपि ।। ३८ ।।

निवेद्य फलमूलादि दन्तावलवरो हरम् ।
संस्तौति भरितानन्दो (संस्तौत्यानन्दभरितो) ।
मदधाराकटस्रवः (स्रवन्मदजलोज्ज्वलः) ।। ३९ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सुप्रतीकः (उवाच)

श्रीकालकाल जितसर्वदितिप्रसूत
पातालमूलपदखेलन विश्वलील ।
पाह्यब्जजाच्युतशचीधवपूजिताङ्घ्रे
गौरीमनोहर विलासनिधानशील ।। ४० ।।

एवं दिग्गजवर्यपूजितमहालिङ्गानि तुङ्गानि ते
प्रोक्तान्युत्तमभोगिलोकतिलकालङ्कारसद्धाटकम् ।
लिङ्गं शाङ्गमुमापतेः प्रियतमं सम्पूजितं वा स्मृतं
चित्ते चिन्तितकामदं किल महापापौघसङ्घैकभित् ।।

सूतः उवाच

नैतच्चित्रमहो त्रिणेत्र चरणाम्भोजप्रभाभावृतः
चित्रं चापि जगत्पवित्रितमिदं भात्यन्तरङ्गे मम ।
किं सत्रावभृथाप्लवैर्वरगवां दानैर्महादानतः
तुङ्गाश्वेभवरान्नराशिसुमहादानैर्व्रतैश्चापि किम् ।। ४२

यो वा को वाऽपि शम्भुं भजति भुवि नरः किन्नरो वा सुरो वा
मारापारशराभिघा तरहितो भूभाररूपाः परे ।
धन्यो मान्यो हि मन्युप्रभृतिगुणगण श्रेष्ठतामन्युमान्सो
विद्योतद्द्युतिरिन्दुकुन्दधवलप्रेमास्पदाङ्गो भवेत् ।। ४३

वरं रासभो वा वरं सूकरो वा
वरं जारचण्डालकन्यासमेतः ।
वरं पामरो वा नरोऽवासुरो वा
हरापारलिङ्गार्चनावर्जितो न ।। ४४ ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उद्भिज्जानि जरायुजानि च महाभूतानि चाण्डोद्भवा
न्यावृत्तान्यसकृन्महेश्वरमहाधाम्न्येव तानि ध्रुवम् ।
संस्थान्यप्रतिमप्रभावविहिते वेदान्तवेद्ये हरे
हारा एव विलीय न प्रतिभवं यान्त्येव शर्वाश्रयाः ।।

उत्क्रान्तिक्रान्तदेहाक्रमभरणमहाघोरसंसारचक्रे
नक्रप्राया उदारा धनसुतवदनभ्रान्ति संश्रान्तदेहाः ।
ईहामोहेर्ष्यया ये द्रुतगतिभृतिभिर्नाशजन्माद्यवस्था-
संस्थास्तु मन्वते ते भ्रमदुदरदरीपूर्तयेऽतिप्रमूढाः ।।

स्कन्दः (उवाच)

एवं दिग्गजमौलिधारितमहीमीशार्चनायोद्यताः
शुण्डादण्डविमर्दिताण्डकटभिर्घोरोरुसद्बृह्मितै।
उच्चैर्घोषपरायणा गजवरा दन्तित्वगाशाम्बरं
सम्पूज्य प्रमथाधिनाथमगजाकान्तं गजास्ते सदा ।। ४७

भीमोऽम्शः कथितोऽष्टमोऽष्टतनुकश्रीपादपद्मार्चकैः
श्रोतव्यः सकलाघशैलभिदुरो मारारिभक्तिप्रदः ।
श्रीदेव्यै कथितो महेशवदनात्ततुभ्यमुक्तो मया
किं भूयः परिपृच्छ्यते तव मुदा तद्वच्मि शैवाग्रिणे ।।

।। इति श्रीशिवरहस्ये अष्टमांशे त्रिंशोऽध्यायः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

AN APPEAL

Manuscripts on Palmleaf or Paper of the ancient works of the wise men of the past, are the great treasures, solely inherited by the Nation and it is the moral obligation of persons who possess them to preserve them safely for the future generations of mankind.

Probably you have some of these in your possession or you know friends or neighbours who possess them. You can make a great contribution to the cause of the preservation not only of our National Culture but also to the Culture of Humanity as a whole by arranging to present such manuscripts to the famous T. M. S. S. M. Library, Thanjavur.

The Manuscripts so presented will be accepted and acknowledged with pleasure and gratitude by the authorities of the Library, preserved with meticulous care and made available to successive generations of readers and scholars for study and research. The hitherto unpublished works found among them, will be printed and published in due course, as facilities occur, with the expression of the Library's gratitude for your gift.

The great Scholar King of Tanjore, Rajah Serfoji, has attained immortal fame by dedicating enormous time and wealth to the expansion and firm establishment of this world famous "Sarasvati Mahal Library". It is open to you to share the honour of Serfoji, in your own measure by contributing your manuscripts to the great institution built by him.

This great Honour is beckoning to you to accept it. Will you hasten to take it up? The Library waits for your answer.

DISTRICT COLLECTOR AND DIRECTOR
Sarasvati Mahal Library,
Thanjavur.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy



சரசுவதி மகால் நூலக அச்சகம்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy